M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref.
Ser. 1480

Title: Sauiik Nyaya Nirnaya

1480

In Complete

C

Sarisiti Nyaya Nirnaya Brahma : Title

Sutra Bhasya : ~~Author~~

Bhagavad Ananda : ~~Editor~~

: Year, Vols.

SK : Publisher

1480 : Pages 31 to 68 : Remarks

स्यान्मोक्ष इतिभावः॥ अदृष्टत्वादीनांप्रधानगामित्वेपिजडत्वादीनांतत्र योगाच्चतदंतर्यामीत्युक्तं तर्हि भूतयोनि
वाक्ये अदृष्टत्वादीनामनुक्तेरदृश्यत्वादिगुणको भूतयोनिः प्रधानमेवेत्याशंक्याह अदृश्यत्वादीति॥ अपर्यवसाना वाक्यमोहा
येति॥ अपरविद्योक्त्यनन्तरं यापरा विद्योच्यते तां विशिनष्टि येयेति॥ अद्रेश्यंचवर्णसमुदायाव्यवच्छिन्नत्वादिति॥
अद्रेश्यमग्राह्यं ज्ञानेंद्रियाविषयो ग्राह्यं कर्मेंद्रियाविषयः अगोत्रं वंशशून्यम् अवर्णं जातीहीनं न केवलमिन्द्रियावि
षयत्वहीनं चेत्याह अचक्षुरिति॥ न विद्यते चक्षुःश्रोत्रे यस्य तत्तथा चक्षुःश्रोत्रोक्तिरनुक्तज्ञानेंद्रियोपलक्षणा
र्थं॥ कर्मेंद्रियरहितमाह अपाणीति॥ पाणिश्च पादश्च पाणिपादं तन्नास्ति यस्य तत्तथा अनयोरुक्तिरनुक्तकर्मेंद्रि
योपलक्षणं नित्यमनाशोपलक्षितसत्ताकं विभुं प्रभुं सर्वगतं सर्वकत्प्यैन व्यवधिहीनं सुसूक्ष्मं दुर्ज्ञानत्वात्॥
तदव्ययमपक्षयाभावाद्यद्योक्तमक्षरं भूतयोनिं भूतकारणं धीराः पंडिताः पश्यंतीति यदक्षरं यया धिगम्यते
सापराविद्येत्यर्थः॥ अदृश्यत्वादिसाधारणधर्मदृष्ट्या संशयमाह तत्रेति॥ भूतयोनिः सप्तम्यर्थः साधारण
स्याप्यंतर्यामिशब्दस्य जीवव्यवसायाया नित्यसिद्धत्वाद्यंतत्वाद्यदाने नेश्वरपरत्वमुक्तमिहापि साधारणादृश्यत्वा
दिधर्मस्याचेतनदृष्टांतोपादानबलात् प्रधानतिष्ठते तिपूर्वपक्षमाह तत्रेति॥ भूतयोनिर्वाक्यस्य निर्विशेषत्र
लणपन्नयोक्तेः संगतयः॥ एवं पूर्वपक्षे प्रधानस्य शारीरस्य वा ध्यानं सिद्धांते निर्विशेषवस्तुधीरितिफलं॥ दृष्टां
तदार्ष्टांतिकयोस्तुल्यता नियमात् दृष्टांतस्याचेतनत्वाद्दार्ष्टांतिकस्यापि भूतयोनेरचेतनत्वमिति तिहेतुमाह अचेत
नानामिति॥ ऊर्णनाभिर्लूताकीटः स्वदेहाव्यतिरिक्तानास्तंतून सृजति उपसंहरतीत्यर्थः॥ सतो विद्यमा
नाज्जीवत इति यावत्॥ इहेति सर्व्वाचस्त्वोक्तिः॥ दृष्टांतमात्रेण समाधत्तेन्नेति॥ इहेत्यसत्तादिश्यो सत्ता वि

३२

त्यर्थः॥ केवलस्याचेतनस्य वा कारणत्वं चेतनाधिष्ठिताचेतनस्य वा तत्राद्यं पक्षं प्रत्याह नहीति॥ शरीरस्यापि तत्राव्यपत्यतिरि
क्तत्वादित्यर्थः॥ द्वितीयमंगीकरोति चेतनेति॥ यद्यपीत्ति केपि चेतनाधिष्ठितं प्रधानं जगद्धेतुरिति भावः॥ सर्वत्र प्रधान
स्य प्रसुप्तत्वात्कथं पुनस्तदाशंका तत्राहापि चेति॥ इहेत्यत्रेति॥ च भूतयोनिवाक्ये किं॥ विरुध्यमानत्वमप्रधा
नविषयत्वं॥ यद्यात्रेति॥ प्रधानमुक्तं विरुध्यमानत्वं धर्मस्य तस्मिंश्च संभवितत्वं च कोपि प्रधाने विरुद्धधर्मान्वेपि वा
क्यशेषोस्तीति शंकते नन्विति॥ भूतयोनेरक्षरस्य पंचम्यंतात्तरश्रुत्या प्रत्यभिज्ञानात्तत्र धर्मोत्तरशब्दो क्षरस्य
सर्वज्ञत्वादितिवा वाक्यशेषस्याद्यतिरिक्तं विषयं दर्शयन्नाहान्वेति॥ अक्षरस्य जगद्योनित्वमुक्त्वाप्यः सर्वज्ञः सर्ववित्
ति सर्वज्ञस्य तदुक्ते लिंगप्रत्यभिज्ञानादक्षरस्यैव सर्वज्ञत्वादिति चेन्नाक्षरश्रुतिप्रत्यभिज्ञातो लिंगप्रत्यभिज्ञाया दुर्बलत्वा
देनाक्षरं पुरुषं वेदेति॥ चेतनेभिन्नतयोनेः श्रुत्या प्रत्यभिज्ञानाद्भगवत्प्रकृतित्वलिंगानुगृहीतश्रुतिप्रत्यभिज्ञया केवलश्रु
तिप्रत्यभिज्ञा बाध्येति चेन्नातस्मादिति निमित्तेपि पंचम्यीसंभवाच्चेवमपि प्रत्यभिज्ञायाः सर्वस्य चेतनदृष्टान्तानु
गृहीतप्रत्यभिज्ञाभावस्यात् तस्मात्प्रधानमेव भूतयोनिरित्याह प्रधानमेवेति॥ सर्वज्ञतादिवेकायात्र प्रधाने यात्स्वमि
त्युक्त्वा जीवो देहाद्यतिरिक्तो स्वदय निःश्रेयसार्थ येनिरूपणेत्वेति पञ्चान्तरमाहुर्यदिति॥ योनिशब्दस्य प्रकृत्य
र्थत्वे निमित्तार्थत्वे च प्रधानस्य सर्वज्ञत्वादि विरुद्धस्य भूतस्य वा देहाद्यतिरिक्तस्य द्विविधपुमर्थार्थत्वे ध्यानार्थमित
द्विरुपसंहर्तुमिति शब्दः सिद्धान्तस्तत्रभगवतात्पर्यस्यैवमिति॥ तत्र प्रतिज्ञां व्याचष्टे। योपमिति॥ प्रधानो नादोसंभ
वति नियमासिद्धिरित्याहरूकथमिति॥ नियामकं हेतुमवतार्य व्याचष्टे धर्मेति॥ भूतयोनिरिति हेत्वक्तः॥ हेतोर
न्यथासिद्धिं धुनीतेनहीति॥ अक्षरात्परत इत्यत्र तेनोपेक्षतमिति शेषात्त्रिर्णय॥ यदि हापि साधारणो

३२

पक्रमस्थस्याद्यत्वादेः शेषाद्बलमिष्टता निर्णये त्यर्थः॥ वाक्यशेषो भूतयोनिर्विषयो नेत्युक्तं स्मारयति नन्विति॥ अनि
करत्वे प्रकृतिरिति स्मृतेरक्षरादिति पंचम्या जायमानप्रकृतित्वेनोक्तमक्षरं तस्मादेतद्ब्रह्मेत्यत्रापि पंचम्या प्रत्यभिज्ञा
यते तेन भूतयोन्यर्थ एव वाक्यशेष इत्याहान्वेति॥ तस्मादिति विशेषेण सर्वज्ञत्वादिशेषेण सर्वविदित्यज्ञानमयतपः सहिता
त्कार्यं ब्रह्मस्वरूपं सात्मकं नामरूपप्रपंचस्य भूतात्मकमन्नं च व्रीहियवादि सर्वं जोतिकं तत्कारणस्याप्नोतीत्याह
तस्मादिति॥ लिंगप्रत्यभिज्ञा फलमाह तस्मादिति॥ श्रुतिप्रत्यभिज्ञा लिंगज्ञातो बलवती दर्शितेत्याशंक्य पंचम्यंतात्त
रपदेन प्रकृतात्तरगामीत्याहात्तरादिति॥ तत्रगमकं पृच्छति कथमिति चेतनेभूते योनौ प्रथममेव श्रुतिप्रत्यभिज्ञाना
दित्याह येनेति॥ येन ज्ञानेनाक्षरं प्रकृतं भूतयोनिं सर्वज्ञं पुरुषं सत्यं वेद तां ब्रह्मविद्यामुपसन्नाय शांताया चार्यः प्रोवा
च प्रश्नादित्युपक्रम्यात्तरात्परतः पर इत्युच्यमानः परोन भूतयोनिरतिरिच्यते॥ तथा च कश्चिद्भगवत्प्रकृतित्वं क
चित्तन्निमित्ततिन वैषम्यमिति भावः॥ पंचम्यंतात्तरपदस्य भूतयोन्यर्थत्वाभावे तदाव्यमिति शंकते कथमिति॥ तत्र व्या
विर्नपरिहारं स्मारयत्युत्तरेति॥ पराविद्येति समाख्यानादपि भूतयोनिरक्षरस्य प्रत्यते त्याहापि चेति॥ भूतयोनेर
परविद्यागम्यत्वं निराहतन्त्रेति उदाहृतवाक्ये प्रतीतधर्माहतन्त्रेति॥ तथापि प्रधानं जीवो वा परविद्यागम्यमक्षर
स्यादित्याशंक्याह यदीति॥ कार्यकारणविषयतया भोग्यभोक्तृविषयतया वा परस्परविभागमाशंक्याह परेति॥
प्रधानादिविद्याविमुक्तिफलतया परास्यादित्याशंक्याह नचेति॥ जडमात्रस्य तद्युक्तो जडस्य चेवाधीनं मुक्तिहेतुत्वि
मात्रधियस्तद्भावादित्यर्थः॥ यदि प्रधानस्य जीवस्य वा भूतयोनित्वेन तद्विद्यापरविद्या तदात्तत्रोच्यमानसर्वज्ञ
विज्ञानस्यापीष्टत्वात्॥ देवि घेहति द्वित्वप्रवर्णनस्यादित्याहतिस्त्र्येति॥ इष्टापत्तिं प्रत्याचष्टे देहति॥ इहेतु

पक्रमोक्तिः। इतश्च कृतयो निबाधं ब्रह्मनिष्ठमित्याह कस्मिन्निति॥ एकविज्ञानेन सर्वविज्ञानं पश्चात्तदपि स्यादित्याशंक्या
ह नेति। अचेतनस्य भोग्यमात्रस्यैकमयनमाश्रयस्तस्मिन्नित्यर्थः॥ मानुषादिनात्मत्वाभेदमाह। प्रधानेनाक्षिप्तेभोग्यव
र्द्धितानेपि न चोक्तज्ञानमित्यर्थः॥ जीवपक्षेतद्दूषितं भोग्यधीरपि नित्याह भोग्येति॥ ब्रह्मविदेति समाख्ययापि कृतयैतन्निर्व
लतेत्याह पिचेति। सर्वविद्यानां प्रतिष्ठा समाप्तिर्यस्यां ततो निरतिशयपुरुषार्थलाभात्तां ब्रह्मविद्यां सर्वविद्याविद्य
वस्त्वधिष्ठानविषयतया वा सर्वविद्याप्रतिष्ठमथर्वनाम्ने कुत्रचित्स्वपुत्राय प्राह स ब्रह्मा लोकस्य वा नित्यर्थः। ब्रह्मादे
वानामिति वक्तृतत्त्वोपक्रान्तएवेत्याशंक्याह समाधानमिति। तथापि कथमक्षरस्य ब्रह्मत्वं तत्राह सचेति। ब्रह्मविद्योप
क्रमेप्यपरविद्यावदक्षरविद्यापि ब्रह्मविद्या माभूदित्याशंक्य उक्तां तां या अन्यत्र अनुक्तिवदप्यनुक्तौ वाधाक्ष
रविद्या ब्रह्मविद्येत्याह परेति। तस्यास्तत्त्वसंसारस्य सार्थत्वं कथं तत्राह तथाहीति। एवं तेन गच्छन्तीति च्छ
वाः विनाशिनः तत्सल्लिंगोद्दिश्य द्वादशदैवोक्त्यादि मन्त्रेण साधयत्यदादि ति। केते यज्ञरूपा यज्ञो रूपमुपाधिर्येषां ति
तथा। हि रुक्मिगादिशब्दस्य यज्ञोपाधिकत्वादष्टादश षोडशर्त्विजः पत्नी यजमानश्चेत्यपि फलत्वादवरं कर्म येषु च प
श्रयमुक्तं श्रुत्या विहितमेतदैवकर्म श्रेयोहेतुर्न ब्रह्मधीरिति ये मूढा ह्यभ्ये तिते पुनः पुनर्जरामृत्युं मरणमेवाप्नुवन्ती
त्यर्थः॥ आदिपदमभिधाया मंतरेव तिमान इत्यादि संग्रहार्थं॥ इतश्च परविद्या दोषत्वेनैवापरविद्योक्तिरित्याह॥
निर्वेदे विति। प्रत्यक्षादिना कर्मसाध्यानलोकानानित्यतया ज्ञात्वा निर्वेदं वैराग्यमायाद्दृष्टे तद् कुर्यात्तकथं नास्त्यकृ
तो मोक्षः कृतेन कर्मणा नित्यफलार्थी चाहं तस्मात् किं कर्मणेति विरक्तस्तस्य ब्रह्मणो विज्ञानार्थं गुरुमभिगच्छेत् गुरु
पादोपसर्पणं सत्वाह। ननु किं हेतुज्ञानाय श्रवणादि कुर्यादित्यर्थः। रिक्तहस्तस्तु नोपेयाद्राजानं देवतं गुरुमिति न्या

येन समित्पाणिरित्युक्तं श्रोत्रियमित्यादिना अध्ययनहीनस्य वाक्कर्मिणो वा गुरुत्वं वार्यते कर्मनिर्देश्यात् ततो विरक्तस्या
धिकृतो केऽक्षरविद्या विरक्तस्याधिकारोक्तेरक्षरविद्या ब्रह्मविद्येति समुच्चयार्थः। पूर्वपक्षबीजमनुभाषते यत्विति।
सर्वथा वास्त्यां साम्यमंशेन बाधा इत्याह तदप्युक्तमिति। सर्वथा साम्ये परस्याप्यनिष्पत्तिमाह पिचेति। कार्यस्य कार
णाव्यतिरेको विवक्षितोंऽशस्तेन साम्यमिष्टमेवेति मत्वोपसंहरति तस्मादिति। अतयोने। ब्रह्मत्वे हेत्वंतरमाह विशेषणे
ति॥ चकारार्थमाह तथेति॥ एवकारार्थमाह नेतरा विति॥ इतः शब्दार्थे। स्फुटयन् प्रश्नपूर्वं हेतुं तदुपमाह कस्मादिति॥
विशेषणं त्वजा वो मे घ्रेके न प्रधानमितिचिन्तयन् व्याकुर्वन्नाप्याचष्टे विशिनष्टीति दिव्यो द्योतनात्मकः स्वयंज्योतिस्त
त्र श्रुतेतरप्रसिद्धार्थो हि शब्दः। अमूर्तत्वं पूर्णत्वमाकाशादिशेषमाह पुरुष इति। कार्यकारणात्मपरिच्छेदमाशंक्याह स
बाह्येति। बाह्यं कार्यमभ्यन्तरं कारणं॥ ताभ्यां कल्पिताभ्यां सहाधिष्ठानत्वमाति इति। तस्य सर्वकल्पनाधिष्ठानत्वे श्रुतिप्रसि
द्धार्थो हि शब्दः। जन्मादिषड्भावविकारशून्यमाह अज इति॥ प्राणमनोभ्यां संसर्गाभेदभावात् परिशुद्धिमाह अप्राणो हीति शारी
रस्यापि विशेषणस्यादित्याशंक्याह न ह्येति। तन्मयत्वापि रूपादिधर्मादश्यत्वादयः विशेषणस्यानन्यथासिद्धत्वफलमाह
तस्मादिति। विशेषणतुल्यत्वे विवादो तीयं हेतुं प्रधानपक्षे योजयति तथेति। नैतेऽक्षिव्यतिरेकमिति किं तद्व्याकृतं त
दाहनामेति। तयोर्बीजस्य ईश्वरस्य शक्तिरूपं तत्परतं व्याकृतानोनी। नाम्नां सद्दलं संस्कारस्वरूपं वर्तते चेति। अतस्तत्त्व
मीश्वरपदलक्ष्यं स्वरूपमाश्रयोऽस्येति तयोरक्षरस्य तत्कार्यत्वेनातत्त्वश्रयत्वात्तस्यैवेश्वरस्यैव जगदितिवृत्तोपुपा
धित्वेनस्थितं विकारहेतुत्वादि कारत्वस्य पर्णं ननु नामरूपयोर्बीजं शक्तिरूपं वाच्या कृतं यन्नानामरूपैरेव बी
जे तयोः शक्तिरूपं तदेव तत्त्वकृतस्य त्वंतत्कारणत्वादीश्वरस्याश्रयमिति साक्षीभूतशब्दो विषयार्थस्तस्यैवेश्वरस्य जीव
त्वभासस्य बुद्ध्यादिद्वारा कर्तृत्वाद्युपाधिकृतमिति व्याख्येयं भाष्यमिति निर्वेदं आश्रयशब्दस्याभूतार्थत्वाद्योगात्

गाऊ वत्वापत्तेश्चाव्याहतसंबंधत्वात् । परिशुद्धेश्चितौ तत्संबंधश्चैव्याहतो ॥ ह्यपहिर्मतो नानाजीववादः ॥ अत्तरशब्दार्थ
मुक्तापरिशिष्टं व्याचष्टे तस्मादिति ॥ इहेति प्रकृतवाक्योक्तिः ॥ प्रधाना इलयो नं इह प्रधानमिष्टमस्त्वतो ॥ प्रतियोगित्वादित्या
शंक्याह नात्रेति ॥ प्रतियोग्यनेनाकारिकपंचेहोक्तिस्तत्राह किंतर्हीति ॥ मतस्य स्वमतानां स्वदृष्टं कारणमित्यर्थः ॥ इहेति
श्रुतिसूत्रयोरुक्तिः ॥ मकृतयोर्नेश्वरं तर्हि त्वं तरमाहरुकुतश्चेति ॥ रूपोपन्यासाच्चेनेतरा विलनुषंगः ॥ वृत्तिकारमतेन व्याक
रोत्यपि चेति ॥ अग्निर्मूर्धाकेसोवावस्तोकोगितमाग्निरिति मजेः पद्भ्यामितिप्रथमार्थपादे पृथिवीत्यस्य स एष सर्व
भूतानामंतरात्मावित्यर्थः ॥ एवंरूपोपन्यासेपि किंस्यात्तत्राह तत्रेति ॥ अन्यथासिद्धिं प्रसाध्य हूचेति ॥ तनुमहिमत्वपरिछिन्न
शक्तित्वं प्रधानविषयत्वं तस्य दूषयति । नापीति ॥ अन्यथासिद्धिकृतमाह तस्मादिति ॥ मानाभावेन शंकते कथमिति ।
मानं वक्तुं तस्मात्प्रकरणादिति । प्रकृतत्वेपि न तयोनेरनिर्देशादेकथमनुवृत्तिस्तत्राक्षिप इति ॥ तदेवस्फुटयति ॥
तेतिशब्दांतेनेतदेवस्फुटयतियथेति ॥ अहश्यत्वादिधर्मकस्य विग्रहवद्रूपमित्याक्षिपति कथमिति ॥ समाधत्ते सर्वेति
यथा कश्चिद्विलालविद्यात्मनः सर्वात्मत्वविवक्षया अहं मनुरभवं सूर्यश्चेति ॥ सामगाय तिन त्वान्नादवमात्मनो जिज्ञेति ॥
तस्यापुमर्थत्वात्तथेहापीत्याह हमिति ॥ एकदेशिनं दूषयत्यन्ये पुनरिति ॥ हेतुसिद्धिमाशंक्य पूर्वोत्तरवाक्येषु जायमानत्वे
नतत्त्वद्धोक्तिरिहापि जायमानत्वेनोक्तिरस्तीत्याह तस्मादिति ॥ यस्य सर्वो हृदो कामेनःस मिथ इव जास्त कः सोपित
स्मादेवजायत इत्यर्थः ॥ तथापि मध्ये परस्येवरूपमुक्तमित्याशंक्य वाक्यनेदने त्याह इहेति ॥ एकविज्ञानेन सर्वविज्ञान
प्रतिज्ञाबलात्तदर्थं सार्वात्म्यं वक्तव्यं तदेवेदमुक्तकमन्यत्रानुक्तेरित्याशयेनाह सर्वात्मत्वमिति ॥ उत्तरत्रोक्ताव
पि तस्येवेदमपि सर्वात्मान्यस्यायोगादित्याशंक्याह ऋक्तीति ॥ कस्मैप्रजापतये विधेम परिचरेम हिरण्यगर्भः
समवर्तताग्रे इति ॥ तावद्धिहोत्रं न जन्मेत्याशंक्याह समवर्ततेति समजायतःसन् जातमात्र एव स्वरात्रया पतिर्वन्ने

वेति शेषपदर्शनादित्यर्थः ॥ अस्तु भूतयोनिसिद्धं जन्मतस्य कथं सर्वभूतांतरात्मत्वं तत्राह विकारेति ॥ पूर्वकल्पे प्र
कृष्टधीकर्मानुष्ठानात्कश्चिद्यजमानः कल्पादौ हिरण्यगर्भतयाप्रादुर्बभूव तस्य सर्वप्राणाद्यधिष्ठातृत्वाद्धिष्ठात्र
धिष्ठेययोरभेदात्प्राणात्मनासर्वभूतानामध्यक्षं देहस्थितेर्जीयमाने । प्रतिप्रत्यवस्थासिद्धमित्यर्थः ॥ नन्वप रुद्रो भूत
भूतात्मनिमानिनो हिरण्यगर्भस्य विग्रहविशिष्टरूपेण तदधिष्ठेयप्राणादिजन्मानन्तरं जन्मोच्यते चेत् कस्तर्हि ।
सर्वात्मत्वस्ततत्राहास्थितिक्रिति । विश्वंसर्वकर्मसाध्यतपो त्वानं च पुरुष एवेति । सर्वात्मरूपोपन्यासात्परमात्मैवरूप
तयानिर्दिश्यर्थः ॥ नविजत्तणत्वादित्यत्रपरिणामस्यसारूप्यापेक्षाप्रतिकैदेपादेव तस्य च शोरवपीतिमादेविश्व
दर्शेपिदर्शनात्तद्रूपेत्वानियमाद्भूतयोनिवाक्यं निर्विशेषे ब्रह्मण्यन्वितमितिनाव ॥ रूपोपन्यासप्रसंगात्त्रैलो
क्यदेहो वैश्वानरः पर इत्याह वैश्वानर इति विषयं वक्तुं वाक्योपक्रममाह को न इति ॥ आत्मनो संसारित्वार्थं ब्रह्मप
दं तस्यापरोक्षार्थमात्मपदं प्राचीनशालौपमन्यवः सत्ययज्ञः पौलुषिरिन्द्रद्युम्नो भाल्लवेयो जनो शार्कराक्षो बुडिल आश्वतराश्विः ते मीमांसां चक्रुः कुरुस्तेचनि ।
श्चिची यपोद्दालकमाजग्मुः सोपि नवेदसम्यगिति संसहतेन षडपि ते केकेयराजमश्वपतिमागत्योपचुरात्मानमे
वेत्यादि अध्येषि स्मरेत्यि सचतेषां विपरीतधीनिरासेनुसम्यग्धी जियाहद्यिपयालानेवपरेप ष्व ओपमन्यव
कं त्वमात्मानमुपास्से दिवमेवेत्याहे तरो राजा पुनरुवाचैष सुतेजा वैश्वानरोयं त्वमात्मानमुपास्से मूर्धात्वेष आ
त्मनो मूर्धेति व्यपतिष्यद्यन्मांनागमिष्यइति ततः सत्ययज्ञमुवाच त्वं कमात्मानमुपास्स आदित्यमेवेति तत एष विश्वरूप आत्मा
चक्षुस्त्वेतदात्मन इति अंधोभविष्यो यन्मांनागमिष्य इतिराजोवाच एवं क्रमेण घूसर्वादीनामस्य तेजस्त्वं विश्व
रूपत्वं पृथग्वर्त्मात्मत्वं बहुलत्वं रयित्वपादत्वगुणयोगं विधाय मूर्धाद्यं तांधत्वप्राणोत्क्रमपादेहविशीर्णता

३८

वस्तित्वेनोपादानेऽशेषणे रेकैकोपास्तिर्निंद्याचतेषां वैश्वानरं प्रति मूर्द्धत्वादिकावमुक्त्वा समस्तोपासनमाम्नातंय
स्येतमित्यादिआभिमुख्येन विश्वं ।मीमिते जानाति । त्वमितिमानस्तं प्रादेशमात्रं प्रमाणमुपास्ते यस्तस्य सर्वलोकाद्या
श्रयं फलमित्यर्थः ॥ लोकान्नोपक्रमयोः कृतानितरदुपाधयो जोकारस्त्वर्थो त्वानइति नेदः ॥ तत्र सर्वेषिफल नाच
मन्नमत्तीत्युच्यते ॥ ध्यानफलमुक्त्वा ध्येयरूपमाह तस्येति ॥ सुतेजस्त्वगुणो द्यौ वैश्वानरस्य मूर्द्धा निपावितत्त्वसिव
श्वो विश्वरूपत्वगुणः सूर्यस्तस्य चक्षुरेष शुक्ल एष नीलइत्यादिश्रुतेः पृथग्वर्त्मानावर्त्मगमनात्मस्वरूपमस्येति
तथा गतित्वगुणो वायुरस्य प्राणः बहुलत्वगुण आकाशः संदेहोऽस्य देहमध्यं ध्यष्टिर्दने तद्गुणा आपोऽस्य वस्ति
रुमुद्राकृर्पथिवी वैश्वानरस्य प्रतिष्ठानात्तस्य पादौ पृथिव्येव तस्य हेमाधारत्वसंपादनाय । ऊरुमुखएवेत्यादित
था कृकंप्रथमभाग च्छेदित्यादिवाक्यमादिपदार्थः तत्र श्रुतो वैश्वानरो नात्मात्मा वेतिसंशयं कुर्वन्निधर्मतया द्वौ पि
पद्यतत्र यस्यप्रितिये पक्षद्वयमाह ॥ तत्रेति ॥ संशयहेतुं प्रश्नपूर्वकमाह किमिति ॥ सत्यांसामग्र्यां कार्यम्ध्रोव
श्यंफलितमाह तत्रेति ॥ वाक्योपक्रमस्य दृश्यत्वादिसाधारण धर्मस्य वाक्यशेषस्य सर्ववित्त्वाद्युपलक्षितवि
शयत्ववदिहाप्युपक्रमगतसाधारणशब्दस्य शेषस्थहोमाधारत्वलिंगेन प्रसिद्धचनुग्रहो तेन जाठरार्थत्वसि
द्धेरस्त स्तस्यैवोपास्यतेति विमर्शस्य पूर्वपक्षमाह किमिति ॥ वैश्वानर विधा श्रुतेस्सविशेषव्रणपञ्चयोरके ॥
संगतस्य ॥ पूर्वपक्षे जठराग्नेः सिद्धान्ते ब्रह्मणो ध्यानं फलं ॥ साधारणे शब्दे कुतो विशेषप्रतिज्ञेत्याह कुतइ
ति ॥ प्रतिज्ञा विशेषे हेतुमाह तत्रेति ॥ योयं वैश्वानरोऽग्निः सोयं पुरुषाकारे देहं तरित्युक्त्वा तमेव विशिनष्टि
येनेति ॥ पक्षान्तरमाहाग्नीति ॥ तन्मात्र दृष्टेहेतुः सामान्येनेति विश्वास्मै भुवनाय वैश्वानरमग्निमन्त्रां के

३८

तुं तु चिन्हं सूर्यमिह एवन्न तु तव भ्रादेवास्तदुदये दिनव्यवहारादित्यर्थः ॥ कल्पान्तरमाहाग्नीति ॥ तदभिमानि दे
वतायहे हेतुस्तस्यामिति ॥ वैश्वानरस्य देवस्य सुमतौ शोभनबुद्धौ वयं स्याम भवेम तस्यास्सम्भविषयासुमतिर्नवलि
त्यर्थः ॥ तत्रे हेतुराजाहीति ॥ यस्माद्भुवनानामयं राजा कं सुखं हेतुरभिमुखश्रीरस्येत्यभिश्रीरीश्वरस्तस्मा
त तस्य सुमतौ स्यामेत्यर्थः ॥ इहिकमित्येकं पदमित्येके तत्राप्ययमेवार्थः प्रयोगमन्त्रयेपितुल्यप्रयोगो ग्रहार्थमादिप
दं ॥ कथं देवतार्थत्वमस्य प्रयोगस्येति ॥ तथाहेवमाधायाइति ऐश्वर्यादित्यादिपदं धर्मज्ञानवैराग्यादिसंग्रहार्थं ॥
पक्षत्रयेप्य ॥ परितोषमाह तथेति ॥ वाजसनेयकेऽग्निवैश्वानरशब्दाभ्यामिवोपक्रमाद्भ्रेश्वरार्थतेति ॥ पक्षान्तरमाहत्व
यापीति ॥ शारीरे लक्षणया वैश्वानरशब्दोपपत्तिमाह तस्येति ॥ तत्रैव पक्षे तरमाह प्रादेशेति ॥ भूतान्ति देवता
जीव विषयं पक्षत्रयमुपक्रममात्रं प्राणाहुत्याधारत्वादेर्मूर्द्धत्वादेश्चयोगे कुर्यं गार्हपत्य इत्यादिनाहि देहा
वयवाः सन्निहितस्योदार्यस्याग्नेर्गार्हपत्यादित्वेनकल्प्यंते ॥ आस्यमाहवनीयस्तद्धत्तं तत्र होमीयस्मिति ॥ चजा
ठरस्य मुखानुस्य तस्य प्राणाहुत्याधारस्याहवनीयत्वे ॥ नास्ये कल्प्यते ॥ न प्रमूर्द्धत्वादि लक्षत्रास्ति वासहो
वान्च मूर्द्धानमुपदिशन्नेषवाअग्निरात्मा वैश्वानर इत्यादिनामूर्द्धादिर्नोपलोकाद्या ॥ स्तनात्संपाद्यतानेजनिरस्य
पिमूर्द्धत्वादिसिद्धेरारोपित मूर्द्धत्वादिना वह्नत्वात्तस्य वध्र लत्व श्रूमापन्ना घातमत्वेनच भ्रुब लएपि मूर्द्धत्वा
देरारोपेजाठरे तत्कल्पनायाः श्रौतत्वेन विशेषादतो जाठरोपास्तिपरं वाक्यमित्युपसंहरति तस्मादिति ॥ सिद्धान्तयति
तत्रइति ॥ हेतुं प्रश्नपूर्वकमाह प्रत्याचष्टे कुतइति ॥ कौ तौ साधारणशब्दौ कौ वा तयोर्विशेषस्तत्राह यद्यपीति ॥ ना
यं परमात्मागमको विशेषस्तस्य निर्विशेषस्य मूर्द्धत्वाद्ययोगादित्याशंक्याह चत्रेति ॥ व्यवस्थान्तरमध्यात्ममधि

देवमित्येवंरूपं तस्य तथोपन्यासफलमाह ध्यानायेति ॥ कथं परस्यावस्थान्तरत्वात्कन्ताद्यकारणत्वादिति ॥ तदेव
स्फुटयति। कारणस्येति ॥ एतेन जाठरे धूमकेत्वादिप्रत्युक्तं वैश्वानरोपासकस्य सर्वलोकाद्याश्रयफलश्रुतेश्च वैश्वा
नरस्येश्वरत्वमित्याह स इति ॥ वैश्वानरीं रविदः सर्वपाप्मदाहश्रुतेश्च तस्य परत्वं तद्विज्ञानेन तदाह प्रसिद्धेरित्याह एवं
हेति ॥ यथाग्नौ क्षिप्तमिषीकातूलं दह्यते एवमस्य विदुषः सर्वाणि कर्माणि निर्दहितत्वादग्धुं तत्त इत्यर्थः ॥ उपक्रमादपि
तस्य परमात्मत्वं यो स्तत्रैव रूढे जाठरे रूढत्वमुख्यत्वादित्याह को न इति ॥ उक्तलिङ्गानां फलमाह त्येवं तानीति श्रुतिलिं
गसिद्धमुपसंहरति तस्मादिति ॥ स्मृत्या च श्रुत्यर्थः शक्यो निर्णेतुमित्याह स्मर्यमाणमिति ॥ तत्र प्रतिज्ञां पूरयतीत
श्चेति ॥ सूत्रं व्याकुर्वन्नितः शङ्काधमाह यस्मादिति ॥ स्मृतिमाहरतियस्येति ॥ तस्याः श्रुतिवन्मानत्वं सूचयत।
श्रुत्यादरात्तदाहृतदिति ॥ इति शब्दस्य वाक्यसमाप्त्यर्थत्वं व्यावर्त्य हेत्वर्थं व्यनक्ति यस्मादिति ॥ स्तुतेरसद्दारो
पेणापि संभवान्न मूर्धश्रुत्यादेस्तल्लिङ्गत्वमित्याह यद्यपीति ॥ सद्रूपेण स्तुतित्वमौत्सर्गिकमसति मुख्यबाधे दुर्वारमि
त्यर्थः ॥ अस्तु तर्हि स्वरूपाभिप्रायं तिमाह द्यामिति ॥ इहेति त्रैलोक्यदेहस्य वैश्वानरस्येश्वरतायामित्यर्थः ॥ सिद्धान्तं
विधान्तरेणाक्षिप्य समाधत्ते शब्दादिभ्य इति। आक्षेपं विवृणोति न जर्यमाहान्नेति ॥ स्थितः सिद्धान्तः स सम्पर्यः ॥ अन्य
त्वादिना वैश्वानरस्योक्तेश्वरत्वाक्षेपे प्रश्नद्वारा हेतुमाह कुत इति ॥ तत्र शब्दं व्याचष्टे शब्द इति ॥ ईश्वरस्य विरो
धीति शेषः ॥ तदेव स्फोरयति वैश्वानर इति ॥ शब्दान्तरमाहृत यत्येति ॥ सोऽपि श्रौतो वैश्वानरशब्दवदीश्वरेन सं
भवतीति योजना ॥ आदिशब्दोपात्तं लिङ्गमाहेदादीति ॥ वरूत्तमर्थं लिङ्गान्तरमाह तथेति ॥ अन्तःप्रतिज्ञां
प्ररयत्वे तेस्य इति ॥ वाजसनेयकेऽग्निरहस्ये वैश्वानरेऽग्निशब्दो ऽस्तस्य परस्मिन्नयोगात्तत्सामान्यात् शां

लोकेऽपि वैश्वानरोऽग्निरेव स चाहुत्याधारत्वादिलिङ्गाज्जाठर एवेति भावः ॥ तत्रैव लिङ्गान्तरमाह तथेति ॥ यथो
क्तहेतुभ्यो वैश्वानरो नेश्वरस्तथा वक्ष्यमाणहेतोरपीत्यर्थः ॥ अन्तःप्रतिष्ठानमपि वैश्वानरस्येति शेषः ॥ अग्नि
रहस्ये स अप्रपंचो वैश्वानरविद्यासु काः स यो हैतमग्निं वैश्वानरं पुरुषविधं पुरुषेऽन्तःप्रतिष्ठितं वेद सस
र्वलोकाद्याश्रयं फलमसौ तु कं पुरुषेऽन्तःप्रतिष्ठितश्च ॥ अग्निर्जाठर एव प्रसिद्धेरित्यर्थः ॥ तथापि वाजसनेयके
धूमकेत्वादिश्रवणाज्जाठरः स्यादित्युक्तमनुवदति यद्यपीति ॥ अनेकलिङ्गानुगृहीतानन्यथासिद्धं वैश्वानरा
ग्निश्रुतिभ्यामेकं लिङ्गं नेयमित्याह तथेति ॥ जाठरेऽपि धूमकेतुत्वादिकथं चिन्नीतमिति भावः ॥ जाठरे मुख्यं
त्वं धूमकेत्वादि अल्पपरिणतो ऽप्याह्यथेति ॥ एवमिदं शो वैश्वानराग्निशब्दाभ्यामन्तःप्रतिष्ठानोक्त्या चे
त्येति शेषः ॥ तत्रापि कुतो धूमकेत्वादिसिद्धं तत्राह तस्यापीति ॥ अपि रीश्वरदृष्टान्तात: इमां पृथिवीमुत द्या
मपि द्यावापृथिव्या ने वरोदसी पयोजानुरूपेण ततान व्याप्तवानंतरिक्षं च तयोर्मध्यमात ताऽन्तरेवो द्यु
लोकाद्यवयवो ध्येय इत्यर्थः ॥ परिच्छिन्नकर्तृत्वान्नेन द्युलोकाद्यवयवत्वमित्यरुच्या कल्पान्तरमाह तथा वे
ति ॥ धूमकेत्वादिविशेषस्यान्यथासिद्धत्वे फलितमाह तस्मादिति ॥ परिहारमवतारयत्यत्रेति तद्द्वारा
णि व्याचष्टे नेत्यादिना ॥ इदमुपदेशं सदृशं तस्य दृश्यति परमेति ॥ अक्षप्रतिकस्य जाठरस्योपास्य
ते वेधिति शिष्टा सत्त्वावयवतदुपाधिनो ब्रह्मण एवोपास्यत्वे लिङ्गविधान्तरेण व्याकरोत्यथवेति ॥ जाठरस्य
तीकत्वाद्वा तदुपाधिकत्वाद्वा परस्मिन्नपि लक्षणया ग्न्यादिशब्दसिद्धोन तस्य तल्लिङ्गान्यथाकरणे
शक्तिरिति भावः ॥ असंभवादिति। व्याचष्टे यदीति चेति ॥ उपास्यत्वे जाठरे धूमकेत्वादेरस

३६ आ०

त एवारोपः स्यान्न च सति संभवे स युक्त इत्यर्थः॥ अस्तु तर्हि देवतादिविषयत्वे विशेषस्येत्याशंक्याह यद्यपे
ति पुरुषमपीत्यादि विनिजतेय दिति॥ ब्रह्मोपाधित्वं तस्यैतीकस्येरसत्वं केवलयंतस्य सर्वलोकाधाश्रयत्वं फल
मिति शेषः॥ पुरुषत्वेपि कथं ब्रह्मणस्तदन्तः प्रतिष्ठितत्वं तत्राह परमेश्वरे॥ प्रागंतरप्रोक्तयस्याचक्षेये त्विति॥
जाठरस्य चेतनत्वात्पुरुषत्वेन तद्विधत्वमपीत्यर्थः॥ ब्रह्मणोपि पुरुषत्वमेव न तद्विधत्वमित्याशंक्याह पुरु
षेति॥ तत्र ब्रह्मणः पुरुषस्यार्थस्यादिति भावः॥ द्युमूर्धत्वादिविशेषस्य जाठरविषयत्वं संदूष्य देवतादिविषयत्वं दू
षयस्तत एवेति॥ सूत्रं व्याकर्तुं भावसर्वपदत्रयमन्वयतस्य निरस्यत्यपाह यदिति॥ सूत्रमुपाप्य व्याकरोत्यत्रेति
द्युमूर्धत्वादिविशेषः सर्वलोकाधाश्रयफलमात्रं सर्वपाप्मप्रदाहत्वं ब्रह्मोपक्रमे उक्ता हेतवः॥ भूतदेवतयोरपि
द्युमूर्धत्वादिसिध्यतीत्युक्तं प्रत्याह नहीति॥ किंच न देवतायां या निरंकुशमैश्वर्यं किंत्वीश्वरायत्तमतस्तस्ये
व सर्वकारणस्य द्युमूर्धत्वादित्याह परमेश्वरेति॥ पदत्रयसाधारणं दोषमाह प्रत्येति॥ चकारो ब्रह्मशब्दा
योगस्य सर्वपाप्मप्रदाहाद्ययोगस्य च समुच्चयार्थः॥ वाजसनेये ऽग्निशब्दं जाठरार्थमुपेत्य परस्मिन्नजि
तस्यंबंधात्र दत्तानां स्त्रीहत्य ब्रह्मोपास्तिरित्युक्तमित्यग्न्यादिशब्दो ब्रह्मार्थः॥ ततो यदुक्तं द्यु
लोकादिपृथिव्यंतं यच्चाध्यात्मं मूर्धादिचिबुकांतं रूपं तदनुगतं ब्रह्मैवोपास्यं न जाठर इत्याह साक्षा
दिति॥ वराम नच सूत्रार्थविवरणाति पूर्वमित्यादिना॥ जाठरस्य प्रतीकादित्वेन यो हेतुं सूचयति॥ अंत रिति॥
साक्षादीश्वरोपास्तौ विरोधं शंकते अन्विति॥ विरोधं वदस्यत्रेति॥ अंतः प्रतिष्ठितत्वोक्तेर्जाठरग्रहे प्यवि
रोधं प्रतिज्ञाय हेतुमाह नहीति॥ इहेति वाजसनेयोक्तिः॥ अंतःप्रतिष्ठितत्वमिदमापरामृष्ट प्रकरणोपपदयोर

रभावात्॥ जाठराग्न्यभिप्रायेण पुरुषशब्देन करणीश्वरप्रादिमतोऽभिधानात् कथं तद्विधत्वं तदन्तःप्रतिष्ठितत्वं वा
परस्यापीत्याशंक्याह कथमिति पुरुषावयवसंपत्त्या तद्विधत्वं कार्यकरणसमुदायात्मनि रस्मिन्मूर्धादिचिबुकां
तावयवक्लृप्ते पुरुषेऽन्तःप्रतिष्ठितत्वं समुदायिनां समुदायमध्यपातित्वादित्याह यथेति॥ अंतःप्रतिष्ठित
त्वेनाभाध्यस्थेन साक्षी इव लक्ष्यत इति॥ पक्षांतरमाह यथवेति॥ अंतःप्रतिष्ठितत्वोक्तेरविरोधमुक्त्वा वैश्वानर
शब्दस्याविरोधमाह निश्चितेचेति॥ तस्य तत्राग्निरूढेर्न तद्विषयत्वमित्याशंक्याह केनेति॥ सर्वात्मत्वमाश्रित्य यो
गवृत्तिमेव कथयति॥ विश्व-श्चेति॥ सर्वकारणत्वमयोगवृत्तिमाह विश्वेषामिति॥ सर्वेश्वरत्वेनापि लाभमाह विश्वे
चेति॥ सर्वात्मत्वं सर्वकारणत्वं सर्वेश्वरत्वोपलक्षणं तथापि विश्वनरइति स्यात्कथं वैश्वानर इत्युच्यते तत्रा
ह विश्वेति॥ नरे संज्ञायामिति दीर्घता॥ अणप्रत्ययस्तर्हि कथं तत्राह तद्विवत इति॥ अन्यथार्थत्वं प्रत्ययार्था ति
रिक्तार्थशून्यत्वं तथापि कथं परस्मिन्नग्निपदं तत्राह अग्नीति॥ अग्रे नीतो अग्र्यं स्वर्गं नयति प्रत्ययान्तस्याग्निरि
ति रूपं तदंगयति॥ गमयति जगतोयं जन्म प्रापयस्यग्निरग्रणी उक्तः॥ आदिशब्दाद्दहनितोयं गतत्वं सर्वज्ञत्व
त्वं च गृहीतं॥ एवं वाजिशाखायामपि परोपास्तिसिद्धेर्न तद्बलात् छांदोग्येप्यविरोधमित्युक्तं यत्तु छां
दोग्ये परस्मिन्नसंभवद्धिंगमुक्तं तत्राह प्राहपत्यादीति॥ सूत्रत्रयमाकांक्षाद्वारा मादलेक ध्यमिति मतंत्रे
देन व्याख्यामेव दर्शयित्वाह दाक्षश्मरथ्यमतमाह दाक्षिण्येति॥ निमोरीश्वरस्यायुक्ता प्रादेशमात्रतेति
शंकां निरस्यन् व्याकरोत्युपतिमात्रस्येति॥ व्यतिकांता मात्रा परिमाणं येन तस्येति यावत्॥ अभिव्यक्ति नि
मित्तं प्रादेशमात्रत्वमित्येतदेव व्यनक्त्यंतरं भिव्यज्यत इति स्यागोविकाणिमाद्यैश्वर्यख्यापनार्थं महतो

३७

आ०

पीश्वरस्योपासकान्प्रतिसद्भावेनाभिव्यक्तिरितिद्योतयतिद्विजेति।निर्गमितप्रादेशमात्रतयाभ्यक्तेर्हेतुत्वमावान्ने
यंआश्मरथ्येत्याशंक्याहप्रदेशेष्विति।अभिव्यक्तिस्थलमाहातइति।मतांतरमाहानुस्मृतेरिति।व्याचष्टेप्रादेशेति।
पूर्वपक्षविकल्पार्थोवाशब्दः अभिव्यंजकस्थंपरिमाणमभिव्यंग्येआतीप्यसद्दृष्टेत्याहयथेति।वैषम्यमाशंक्य
प्रत्याहयद्यपीति।हृदयस्यपरिमाणंमनः।अनास्मृतावारोपितंस्मर्येकेनाप्यस्तत्स्मर्यमाणेश्वरेध्यस्तमाज
वनमितियथाकयचिच्चित्रपुरुषस्मृतिगतपरिमाणस्यहृदयद्वाराआरोपितस्यस्मर्यमाणेकथमारोपोविषयवि
षयिणोर्विलक्षणत्वादित्याशंक्याहस्मर्तारमाहआदेशेति।उपसंहरत्येवमिति।प्रादेशमात्रश्रुतेर्विषयंकथंचि
दुक्तासाद्यदिविश्वयुक्तंविषयमाहसंपत्तेरिति।प्रतिज्ञांविभजतेसंपत्तिरिति।संपत्तिरत्राश्रुतेरितिपृच्छतिकु
तइति।उत्तरंतथाहीति।तदेवब्राह्मणमुदाहरतिप्रादेशेति।परमेश्वरस्यादेशमात्रमपिसंपादनेनप्रादेश
मात्रमिवसंपन्नविदितवंतोदेवास्तमेवेश्वरंपूर्वमभिसंपन्नास्ततोवायुपर्यंततयापुनर्मतीतेत्वान्वय
यान्वक्ष्यामियथाप्रादेशपरिमाणंवैश्वानरंसंपादयिष्यामितथोपमन्यवप्राचीनप्रतिवाक्यत्वेनप्रतिज्ञाया
श्वपतीराजोवाचकिंकुर्वन्निसुक्तिस्वस्यमूर्धानंशब्दमुपदिशन्नुवाचएणदर्शयन्नेषवैलोकान्नतरादीनतीत्य
तिष्ठतीत्यतिष्ठाद्योवैश्वानरस्यावयवइतिप्रसिद्धेर्मूर्द्धनिवैश्वानरस्याधिदैवंयोभद्द्युलोकस्तद्दृष्टिःकर्त
व्येत्यर्थः।स्वकीयेचक्षुषीदर्शयन्नुवाचएषवैसुतेजाःशोभनतेजाःसहितास्ययोधिदैवंवैश्वानरश्च
क्षुरितिप्रसिद्धयोश्चक्षुषोवैश्वानरस्याधिदैवंयदादित्याख्यंचक्षुस्तद्दृष्टिरित्यर्थः।अध्यात्मंप्रसिद्ध
योर्नासिकयोर्वैश्वानरस्याधिदैवंयोवायुःप्राणस्तद्दृष्टिरित्याहनासिकेइति।अध्यात्मंमुखावच्छिन्नेनभ

३०

सिवैश्वानरस्ययदधिदैवंसंदेहास्यमितिनन्नःतद्दृष्टिरित्याहमुख्यमिति।मुखसंभवात्स्वभुवैश्वानरस्याधिदैवंयाव
स्तिस्थानीयाआपःतद्दृष्टिमाहमुख्याइति।घसिकेचुबुकेवैश्वानरस्ययाधिदैवंपादाख्याःपृथिवीतद्दृष्टिमाहचु
बुकमिति।ननुछांदोग्यवाजसनेयकयोर्नैकाविद्यागुणवैषम्यादितोनवाजसनेयकानुसारेणछांदोग्येप्रादेशमात्रश्रु
तिर्नेतव्येतितत्राहयद्यपीति।अल्पवैषम्येपिबहुतररूपप्रत्यभिज्ञानान्नाद्विधेयमित्यर्थः।विधेयंकिंचिदित्युक्तंतथा
पिप्रकरणभेदाद्विधाभेदमाशंक्याहसर्वेति।न्यायस्यगुणोपसंहाराधिकारेलक्ष्यमाणत्वाद्वाजसनेयकस्थातिष्ठगु
णाःछांदोग्येतद्रुतश्चविश्वरूपगुणोऽत्रनेयइत्यर्थः।छांदोग्यवदितरत्रकोनआत्माकिंब्रह्मेत्युपक्रमाभावान्नविधे
क्यमित्याशंक्यसएषोग्निर्वैश्वानरोयत्पुरुषइत्युपसंहारेपुरुषोद्देशेनाग्न्यात्मत्वादिविधेरुपक्रमेपितस्योप
गमात्पुरुषस्यचपरमात्मत्वादुन्नयत्रविद्यैकावाजसनेयकानुरोधात्छांदोग्येपिप्रादेशमात्रश्रुतिरित्युपसंहरति
संपत्तीति।प्रादेशमात्रश्रुतिःसंपत्तिनिमित्तेत्यत्रश्रुत्यंतरमाहामनंतीति।तत्रव्याकरोत्यामनंतिचेति।एतत्प्र
सिद्धंपरमात्मानाशाभावादनंतःस्वरूपेणानभिव्यक्तोव्यक्तस्तंकथंविजानीयामित्यत्रिप्रश्नेयाज्ञवल्क्यस्योत्त
रंसइति।सहिपरमात्माजीवात्मन्यविमुक्तेव्यवहारतःसंसारिणिप्रतिष्ठितःपरस्यैवमत्यत्वादित्यर्थः।पुनरत्रि
रपृच्छत्तस्यइति।तत्रयाज्ञवल्क्योब्रूतेवरणायामिति।वरणानसःभ्रुवोश्चान्तरंभ्रूमिकासर्वमादत्तेतत्रैवेति।प्रकृ
ताश्रुतिस्तत्यर्थः।इमामेवप्रसिद्धांश्रुतिंनासिकांवारयति।नाशयतीतिविवरणासहितानासीतिनि
श्चयेनोक्तेत्यर्थः।अविमुक्तस्यस्थानकुत्राकावेवरणाकाचनासीति।प्रश्नस्यानुत्युक्तिः।सर्वानिंद्रियवृत्तिकृ
तान्दोषान्वारयतितेनवरणेति।सर्वानिंद्रियवृत्तिकृतान्पाप्मनोनाशयतितेननासीति।नियम्यजीवाधि

ष्ठानत्वद्वारा नियंतुरीश्वरस्याधिष्ठानत्वात्तन्नासा चक्षुषोः पापवारकत्वादिसिद्धौ स्तयोर्मध्येपि स्थानविशेषगवेषणया
पृच्छतिकतमच्चेति॥ याज्ञवल्क्यस्ताह भ्रुवोरिति॥ प्राणो नासिका स्तस्तयोर्मध्यं घ्युलोकस्यस्वर्गस्य परस्य च ब्रह्मलोक॥
स्य संधित्वेन ध्येयमित्याह स इति॥ श्रुत्यंतरसंवादकृतमाहतस्मादिति॥ विशेषणांतरं ब्रह्यस्य भिविधानेति॥ प्रत्य
त्केनसर्वदेघत्वं सर्वात्मत्वेसत्यानंतर्यं सर्वकारणत्वं वा निमित्तिकृत्या॥ त्रिधापत्तेन प्रकरयति॥ प्रत्यमितिपरमेश्वरस्याधप
सत्वोक्तावरोत्तेलक्षणायात्परोपास्ति॥ परं वैश्वानरवाक्यमित्युपसंहरति॥ तस्मादिति॥ सविशेषप्रचुराणां वारूढिब
हुलावाक्यतरच्चास्य ह्लिंगानां वाक्यानां ब्रह्मणपन्वयः सिद्ध इत्यविचार्थे निगमयतीति सिद्धमिति॥ ॥ ॥ इति श्री
मत्परमहंसपरिव्राजकश्रीशुद्धानंदपूज्यपादशिष्य भगवदानंदज्ञानविरचिते शारीरकन्यायनिर्णये प्रथमस्याध्या
यस्य द्वितीयः पादः॥ २॥ ॥ पूर्वस्मिन्पादे सविशेषवस्तुप्रचुराणां वाक्यानां ब्रह्मपरत्वोक्त्या संप्रतिनिर्विशेषे ब्रह्म
प्रचुराणां तेषां तत्परत्वोपक्रुंपादांतरमारभ्यते॥ तत्र प्रथमाधिकरणे ब्रजोज्ञात्मा वैश्वानरः परमात्मेत्युक्तं तर्हि द्ये
लोकाद्यायतनमन्यदित्याशंक्याह घुभ्वादीति॥ यद्यपक्रमस्य श्रुतेर्वाक्यशेषस्थलिंगेन अन्यपरत्वमुक्तं तद्वत्संगेन
नगद्यायतनत्वस्यानिकसाधारण्यात्स्य वाक्यशेषस्थामृतत्वश्रुत्या ब्रह्मपरत्वमाह घुभ्वादीति॥ आपर्वणवाक्यमुदाहरति
ना कल्पनो इदमितितो लोकत्रयं धीस्तनत्वो ॥ पंचीकृतकृतपञ्चकाधिष्ठानत्वमाह यस्मिन्निति॥ कार्यब्रह्माख्यसमस्तं
न्तःकरणस्यतत्रैवकल्पितत्वमाह मन इति॥ इंद्रियसमधिष्ठिदेवतानां तत्रैवकल्पितत्वं सूचयति॥ सहेति
चकारोराहतभूतसूक्ष्माव्याकृतेश्वरान्तर्यामिणामध्यस्तत्वं ध्वनितं॥ मायाख्यां प्रकृतिं कल्पितका र्यपरंपरां च
श्रुत्युदितकर्मिना विलाप्य तमेवाधिष्ठानतत्त्वमद्वयमात्मानं जानथेति॥ मुमुक्षुन्प्रत्याह तमेवेति॥ वाच्य

वाचककल्पनां नामेक्या परोक्षप्रमित्या वा धमाहान्या इति॥ एवमाग्निमोक्षपूर्वकस्तत्त्वसाक्षात्कारः सोपादानसं॥
सारनिवृत्तित्वेनामृतत्वस्यव्यवहारस्थापक इत्याहामृतस्येति॥ आयतनशब्दश्रुतेर्नेदमुदाहरणमित्याशंक्याहान्त्रेति
आयतनत्वसाधारणधर्मद्वयासंशयमाह रदिति॥ अर्थान्तरं प्रधानेत्युपक्रमस्य सा धारणशब्दस्यशेषगतधु
मद्वित्वादिर्लिंगेनेश्वरार्थत्वव दिहाप्युपक्रमस्य साधारण्यायतनत्वस्यशेषगतसेतुश्रुत्यापरिच्छिन्नेसेतुशब्दार्थस्य
वस्त्वे ति पूर्वपक्षयतीतत्रेति॥ निर्विशेषे ब्रह्मण्युक्तश्रुत्यन्वयोक्तिः संगतयः पूर्वपक्षेप्रधानोपास्तिः सिद्धान्ते परईश्वर
धीरितिफलं॥ आयतनत्वस्य ब्रह्मण्यप्रयोगाभ्यार्थान्तरमित्याशंक्य प्रत्याह कस्मादिति॥ अमृतस्येति श्रवणादेवसे
तुरितिच श्रवणादिति योजना॥ अमृतस्येति षष्ठीप्रयोगाद्ब्रह्मणः स्वयममृतत्वादमृतस्यामृतस्याभावात्संयोगे ब्र
ह्मणोनेतिमत्वासेतुश्रुतिं विशदयतिपारवानिति॥ तथापिकुतो नब्रह्मणः सेतुत्वं रक्तत्राह नेचेति॥ आनंसमीपचा॥
रिकमित्युक्त॥ कुलपश्चापि सेतुशब्दस्य मुख्यार्थत्वायोगेपि विधरणस्यागंतुकस्याश्रयणान्निजसिद्धपरिच्छिन्नाभ्य
र्पणं क्तुयुक्तमितिभावः॥ किन्तदर्थान्तरं तत्राहार्थान्तरेचेति॥ सूत्रसूक्ष्मायतनं श्रोतमेवोचितं नस्मात्तमित्याशंक्या
ह॥ श्रुतीति॥ वायोरायतनत्वं साधयति वायुरिति॥ सर्वगतस्यतत्त्वादिवतकुतः सूत्रत्वेत्याशंक्य सम्मतयासूत्रव
द्वस्थानादित्याह॥ वायुनेति॥ आकाशस्यापि सत्त्ववर्त्तनवर्त्तिनमस्तीत्याशंक्यसर्वप्रत्येकस्य नावतया विधारक
त्वमाहायंचेति॥ सं घष्ट्वा निर्णयत्येतानि विधत्तानीत्यर्थः॥ आयतनस्यात्मत्वश्रुतेर्नैवमित्याशंक्याह शारीरोवेति॥
तस्यपरिच्छिन्नत्वान्नसर्वविधारकत्वेत्याशंक्यसकर्मोपास्यादिद्वारा सर्वस्येति हेतुत्वमाह तस्येति॥ विश्वायतनत्वे
नप्रधानस्य वायोर्जीवं कुर्वं ध्यनार्थवाक्यमित्युपसंहरतुमिति॥ शब्दः॥ पूर्वपक्षमनूद्योत्तरपक्षंप्रतिज्ञामादाय॥ यवि

३८

अ०

ग्रहात्वमिति। नन्वसुधियोरिति निषेधात् द्युभ्वादीति यणादेशो प्रसिद्धिरिति चेन्न गतिकारकोपपदात् स्वामन्यपू
र्वस्य नेष्यत इति विशेषणादस्य च कारकोपपदत्वात् द्वंद्वद्वयोः समस्तात् उपपदत्वेऽपि चेन्नेति चेन्न सम्मत्वेऽपि प्रथमप्र
युक्तायादिव भ्वरमप्रयुक्तानुवंशम्य तुपपदत्वमारोप्य समासियण्णादेशासिद्धेर्न च द्वंद्वसमस्यमानानां समत्वनियमो
राजपुरुषादिष्वव्यभिचारात् तस्मादर्पात्मादिवत् द्युभ्वादीत्यविरुद्धं द्वंद्वेन तद्गुणसंविज्ञाने च कृते तस्यायतनमिति लिङ्ग
तेपत्तिज्ञापावि विवक्षितमर्थमाह य दिति। जगद्धायतनत्वस्यान्यत्रापि योगे विशेषोक्तिरयुक्तेत्याह कृत इति। त
त्रहेतुमाहाययोजयति स्वशब्दादिति। आयतनशब्दसमानाधिकृतात्मशब्दस्यादृष्टिमात्रं शक्याहात्मेति। जीवाद्य
वपि तदुपपत्तिमाशंक्योक्तमात्मशब्दश्चेति। पक्षान्तरेषु स्वयमायापयुक्तमित्यर्थः। स्वशब्देन ब्रह्मोक्तात् तस्यासाधा
रणस्वशब्देनायतनत्वोक्तिरिति योजना। अन्तरमाह क्वचिच्चेति। स्वस्यायतनस्यासाधारण्यायतनशब्दादिति योज
नान्तरं मत्वा श्रुतिमाह स्वदिति। सतोऽनिमित्तत्वेनैवमनन्तं प्रत्याह सदायतना इति। असम्भवाधिकरणस्यैव सतः स्थि
तिहितुल्यामेवेत्याशंक्याह सन्मूलाः इति। स्वशब्देन ब्रह्मोक्ता तस्यासाधारण्यं पुरुषशब्देन ब्रह्मशब्देन परशब्देनाप्य त।
शब्देन चोक्तेरित्यर्थोऽन्तरमाह स्वपदेनेति। इहेति प्रकरणोक्तिः। यस्मिन् द्यौरित्यादिवाक्यात् पूर्वोत्तरवाक्ययो
ब्रह्मोक्तेर्मध्येऽपि तद्वदेवयुक्तमादिमध्यावसानानामेकार्थ्यावाक्यैक्यादित्यर्थः। पुरस्ताद्ब्रह्मोक्तिमाह। पुरुष इति। पर
स्तादपि तदुक्तिमाह ब्रह्मैवेति। पुरस्तात्पूर्वस्यां दिशि पश्चात्पश्चिमायां दक्षिणतो दक्षिणस्यां उत्तरेणोत्तरस्यां
यदिदं दृश्यते तद्ब्रह्मैवेत्यर्थः। सर्वत्र ब्रह्मोक्तावपि तदनेकरसत्वमाशंक्याह तत्रेति। उक्तं वाक्यं सम्पर्यं।
सामानाधिकरण्याद्विचित्र आत्मेत्याशंकाभवतीति संबन्धः वैचित्र्यं दृष्टान्तेनाह यथेति। कथं तर्हि तन्निर

३८

सनं तत्राह तामिति। जगदायतनं ब्रह्म तस्मिन्नेकमित्युक्ते कुतस्तदेकरस्यं तत्राह तदिति। तथापि कथं प्रपंचायतनस्य नि
ष्प्रपंचत्वमत आह यथेति। एकशब्दादेवकाराच्चायतनपदस्यैकरसं ब्रह्मात्मत्वेन ज्ञेयमित्युक्तं स्यात्तदेवैतद्व्याख्यानं तरमाह।
विकार इति। वाचारम्भणं श्रुतेर्दर्शयत्वादित्युक्तेश्च विकारो मिथ्या तस्मिन्ननृते निर्व्यापि अभिसंधमभिमानो यस्य तस्यैवेति
यावत् द्वैतं तस्य स्वैपश्यतो निंदा श्रुतेरप्येकरसं ब्रह्मेत्यर्थः। ब्रह्मैकरस्ये सामानाधिकरण्यं प्रपञ्चश्रुतिविरुद्धमित्याशं
क्य पुरुष एवेदं विश्वमित्यादिना विकारस्य द्वैतस्य बाध्यसामानाधिकरण्यं बाधार्थमित्याह सर्वमिति। यदवि
धारोऽपि तं तत्सर्वं वस्तु। नानो ब्रह्म तत्तु यद्ब्रह्म तत्सर्वं अतो न श्रुतिविरुद्धमित्यर्थः। ब्रह्मात्मत्वेन सर्वं त्वविधा वा प्रसिद्धात्
वादेन प्रसिद्धविधिप्रसक्तिरित्यभिप्रेत्य ब्रह्मणो नानारसत्वे श्रुत्यंतरविरोधमाह रुस यथेति। सैन्धवखिल्यो न्तर्बहि
र्विभागशून्यः सर्वात्मना लवणैकरसो यथा तथात्मापि सर्वथा चिदेकरस इत्यर्थः। ब्रह्मण्येकरसस्य प्रति
तिपाद्यत्वे फलितमाह। तस्मादिति। तस्यैकरस्यात् स्वप्रधानादेव स्वस्तद्विरहादित्यर्थः। सेतुश्रुतेर्गतिं वक्तुमुक्तमनुवदन्ति
यत्विति। तस्याविवक्षितां गतिमाहाहैवेति। अन्येति समस्यानावस्थानमयं वा वाक्यचोक्तं सावयवत्वाचेतन
त्वादिवदकुर्मादिपदं। ननु सेतुना विना कृतत्वात्पारवत्वादस्मात्तत्र तच्छब्दादीरिति चेन्नेत्याह। नहीति। अ
त्रापीति। प्रकृतवाक्येऽपि सेतुपदं गम्यते परेणापीति शेषः। विधरणत्वस्यागन्तुकत्वात् पारवत्त्वादेः स्वाभाव्यात्तदे
व सेतुश्रुत्या ग्राह्यमिति चेत्तत्राह। सत्विति। गुणावत्वादपि शब्दैकदेशार्थविधरणगुणस्वीकरणमेवयुक्तं
नत्वन्तर्बहिरर्थपारवत्त्वांशांगीकरणं मुख्यार्थैकदेशत्वाज्ञेन विधरणस्य बुद्धिस्थत्वादमृतस्येति पसीचब्रह्म
पक्षे भावार्थत्वेकारादिति भावः। सेतुशब्दं ब्रह्मण्युपेत्य सेतुश्रुतेर्गतिमुक्त्वा विषयान्तरोक्तावपि तदृतिमाह।

आ०

परइति। सेतुशब्दस्य वाग्विमोकपूर्वकमात्मज्ञानम्॥ येनब्रह्मेति स्थितेपूजितमाहतत्रेति॥ द्युभ्वाद्यायतनंब्रह्मेस
न्नहित्वेनेत्यंतरमाह। मुक्तेति॥ तद्व्याख्यातुंप्रतिज्ञांप्रस्यति। इतश्चेति॥ इतःशब्दार्थस्पष्टयतियस्मादिति॥ मुक्तेनब्र
ह्मणाकुतस्तदेवोपसृप्यमित्याशंक्याह॥ मुक्तेष्विति॥ बंधविश्लेषमुक्तिशब्दार्थेवक्तुंबंधमनुवदतिदेहादिष्विति।
अविद्याफलमाहतत्रइति॥ अनर्थसमुदायस्यसम्यग्ज्ञानाद्धेतेर्विश्लेषमभावंसूचयतिसंततइति। तत्रश्रुतिसंमत्या
नुभवंप्रमाणयतिसर्वेषामिति॥ बंधमनूद्यतत्क्षयंमोक्षमाचलक्षणे। सर्वेषांनयतितदिति॥ उक्तमुक्तस्यानंतरं
प्राप्यंब्रह्मेति॥ श्रुतिरसिद्धेतिशंकतेकथमिति॥ मुक्तोऽश्रुतिमाहन्निघलइति। तथापिकथंद्युभ्वाद्यायतनस्यमुक्तो
पसृप्यत्वंतत्राहविश्रुतिमाहेतुक्तेति॥ यथानद्यःगंगाद्यानामरूपाभ्यांनिर्मुक्ताःसमुद्रंप्राप्यतदात्मनाभवंतिएवं
तथाविद्वानपिसाक्षात्कृतब्रह्मातत्त्वःदेवनामरूपाद्विद्याकार्यान्मोविमुक्तःपरात्परात्परमस्य
स्यानर्थपुरुषंपूर्णमात्मानंदिव्यमखण्डंविद्यातुमुपैत्यात्मत्वेनाप्नोतीत्यर्थः॥ प्रधानादीनामन्यतमस्यापिमु
क्तोपसृप्यत्वसिद्धेरन्यथासिद्धिरित्याशंक्याह ब्रह्मणश्चेति॥ ज्ञानाचस्थायदेतुक्तामुमुक्षुरस्येत्युक्तः॥ तदी
तुक्ताकामानामात्मनिष्ठतानिरस्ताप्रतिबंधाभावाद्वाक्यंचस्थानकुमयेत्युक्तं॥ अक्रेतिजीवस्यस्थोक्तिः॥ सयोह
वैतत्परंब्रह्मवेदेत्यादिसंग्रहार्थमादिपदं॥ परपक्षव्यावृत्तिस्फोरयतिप्रधानादीनांत्विति॥ क्वचिदितिश्रु
तिस्मृतिलोकोक्तिः वाग्विमुक्तेर्नैयत्यव्यपदेशादपि द्युभ्वाद्यायतनंब्रह्मेतिव्याख्यान्तरमाहापिचेति॥ इहे
त्युक्तेस्तुद्धारहरणोक्तिः॥ वाग्विमोकद्वाराद्युभ्वाद्यायतनस्यज्ञेयत्वोक्ताविपकुतस्तद्ब्रह्मेवतत्राहतश्चेति॥ धीरो।
विवेकज्ञानीविज्ञानंपदार्थज्ञानं। प्रज्ञावाक्यार्थधी। धीशीतपदार्थस्यहि वाक्यार्थधीः॥ ब्राह्मणपदमनूक्तद्विजो

पलक्षणं॥ वाक्यार्थधीहेतुत्वेनकर्मकाण्डेवैमुख्यमधिकारिणःकार्यमित्याहनेति॥ बहूनितिविशेषण
दात्मपर्यपिनिषदनुचिंतनमनुज्ञातमनात्मार्थशब्दानामनर्थसंधेयत्वेहेतुर्वाचिइति। अप्रावृत्तिस्यारनाति
वाचश्चब्देनोक्तानितान्यादियोषणामेववबहुशब्दमनुचिंतनंनफलवदित्यर्थः॥ मुक्तोपसृप्यत्वोक्तिफलमाहत
स्मादिति। सिद्धान्तमुक्त्वाप्रधानपक्षंनिषेधतिनेति॥ सूत्रतात्पर्यमाहयथेति। शिष्येविकल्पमसाधारण्यत्वंतद
न्तराणिव्याचष्टेनेत्यादिना। इहेतिवाक्योक्तिः॥ प्रश्नपूर्वकंहेतुमुक्त्वाव्याचष्टेकस्मादित्यादिना। प्रकरणमत्रेत्युक्तं॥
प्रधानसाधकशब्दाभावेफलमाहयेनेति। प्रधानवाचिशब्दस्यसत्वेनेतिधयावत्नतथातदाविशब्दोस्तीतिशेषः
अतश्चब्दादित्यर्थान्तरमाहतदिति॥ सप्तमीपूर्ववत्प्रधानस्यद्युभ्वाद्यायतनत्वाभावेपिसूक्ष्मात्मनःस्यादित्या
शंक्याहातइति॥ अतश्चब्दादित्यलः। शब्दार्थः। अस्तुतर्हिशारीरोद्युभ्वाद्यायतनंतस्मिन्नात्मत्वादियोगात्तत्राहप्रा
णभृच्चेति॥ तद्व्याचष्टेयद्यपीति। भोग्यस्यभोक्तृशेषत्वात्तस्यायतनत्वमुक्तमाशंक्याहनचेति। जीवस्यादृष्टद्वा
राद्युभ्वादिनिमित्तत्वेपिनसाक्षात्तदायतनत्वंसोपाधिकत्वेनाविभुत्वादित्यर्थः॥ नन्वतश्चब्दादिति॥ हेतुरिहा
पिचेद्नुवृत्यतेतर्हिनप्राणभृदनुमानेतच्चब्दादित्येकमेवसूत्रमस्तुतत्राह। पृथगिति। उत्तरसूत्रेप्राण
भृदेवनिरस्यतेनप्रधानंतद्वेवसूत्रकरणदुर्ज्ञानितयोत्तरसूत्रेषुजीवमात्रनिरासस्थापनार्थपृथक्करणंसू
त्रयोरित्यर्थः॥ प्रविच्छेदस्याभासत्वाञ्जीवकाभिप्रायेणसर्वज्ञत्वमायतनमायतनत्वंचजीवेपिस्यादितिमत्वा
पृच्छतिकुतश्चेति। सत्यमुत्तरंतेदेनेति॥ विज्ञातेनेदृत्यादिना। इहेतुद्धारहरणोक्तिः॥ तथापिज्ञेयमायतनंप्रा
णभृदस्तुनेत्याहतत्रेतिनिर्धारणार्थसप्तमीजीवस्यब्रह्मणोर्भेदत्वनिरासेनस्यात्मात्मजमेवजानथेतीति।

५२ आ.

वचनपर्यवसानाज्जीवस्यायतनत्वशंकायत्वन्निरासे हेत्वंतरं वाच्यमित्याह। कुतश्चेति सूत्रमुत्तरपादाय व्याचष्टे
प्रकरणं चेति। तस्य परमात्मविषयत्वे हेतुमाह कस्मिन्निति। प्राणभृतिजीवेपि तच्छब्दे। न सर्ववित्त्वादि
षयत्वं प्रकरणस्येत्याशंक्याह परमात्मनीति॥ जीवस्योपाध्यैक्येनाविवक्षितत्वात् ज्ञानेपि सर्वज्ञानसिद्धे स्तु
स्यायतनत्वाघ्नात्वे हेत्वंतरं वाच्यमित्याशंक्य सूत्रेण परिहरति। कुतश्चेत्यादिना। व्याचष्टे द्युभ्वादीति निर्दे
शमेव दर्शयति॥ तयोरिति विनिगमनार्थमाह ताभ्यां चेति। स्थितेश्वरस्यादनाज्जीवस्य यद्यपि कथमीश्वरस्यैव द्यु
भ्वाद्यायतनत्वं तत्राह यदिति॥ ईश्वरस्यायतनत्वेनाप्रकृतत्वे जीवे वा तत्पृथक्कथनानुपपत्तिरित्युक्तमेव व्य
तिरेकद्वाराऽऽह। अन्यथेति। जीवस्याप्यायतनत्वेनाप्रकृतत्वे तत्पृथक्कथनानुपपत्तिरिति शंकते न्विति। तस्ये
श्वरार्थं लोकसिद्धस्यानुवादत्वान्नैवमित्याह नेति॥ जीवस्यापूर्वत्वाभावेनाप्रतिपाद्यत्वमेव प्रकटयति क्षेत्र
ज्ञो हीति॥ ईश्वरस्यापि लोकवादिसिद्धत्वादप्रतिपाद्यतेत्याशंक्याह ईश्वरस्त्विति। तयोरित्याद्युक्ते बुद्धि
जीवयोरुक्तत्वात्तत्प्रसिद्धेः सत्त्वं तत्राह गुहामिति। गुहाधिकरणेनेदमुदाहरणमतं विवक्षित्वा विलक्षणत्वा
त्। तत्राह यदेति। न हीह परानुक्तेः बुद्धिजीवयोरेवोक्तत्वात्कथं परस्याधिकरणगतिरित्याह कथमिति॥ जी
वस्यापि परात्मत्वेन सत्त्वादुपाधानादरादुपहितत्वेन निषेधेपि तदस्य परस्यायतनत्वमित्याह आपोति
कथमेकस्यैवोपाधिविशिष्टत्वाविशिष्टत्वेन भेदाभेदौ तत्राह यथेति। प्रायेणातोऽनुपहितस्यावेद्यस्ये
तिशेषः। तस्य चेदायतनत्वं न निषिध्यते किं विषयस्तर्हि निषेधस्तत्राह तस्मादिति। पक्षांतरायोगे सिद्धां
तमुपसंहरति तस्मादिति॥ इत्यश्वायतनवाक्ये ज्ञेयब्रह्म परमित्याह तदिति। तेनैव सिद्धत्वे हेतुमाह।

५२

तस्येति॥ तर्हि गतार्थमधिकरणमनर्थकमित्याशंक्य अतयोनिवाक्यमध्यस्थं नैतदिति कृत्वा चिंतयेदमधि
करणमित्याह। अयं चार्थमिति। आत्मशब्दाद्द्युभ्वाद्यायतनं ब्रह्मेत्युक्ते। तत्रात्मशब्दस्तरति शोकमात्मवि
दित्याब्रह्मणि प्राणे प्रयोगादनैकांतिकः स्यादित्याशंक्याह भूमेति। पूर्णसुखात्मनि निर्विशेषे ब्रह्मणि भू
मविद्याश्रुतेरन्वयोक्तेः संगतिरिति। मत्वाध्यायोपपादकं पमति इदमिति॥ नाल्पे सुखमस्ति भूमैव सुखं न
स्यादिति निरतिशयं सुखमिच्छता भूमैव विशेषेण ज्ञातुमेष्टव्यो न परिच्छिन्नमिति सनत्कुमारोक्तिमाह तेनेद
मात्विति॥ तदुपश्रुत्य नारदो हे भगवन् भूमानमेव विशेषेणाहं ज्ञातुमिच्छामीति पृष्टवानित्याह भूमानमिति। भूम्नो ल
क्षणमाह यत्रेति॥ व्यवहारातीतं पूर्णं वस्तु भूमेत्यर्थः॥ लक्षणं व्यतिरेकेण स्फोरयितुं परिच्छिन्नस्य लक्षणमा
हाथेति। अन्वयव्यतिरेकस्यापीष्टसिद्धौ इत्युक्तवाचोऽतकोऽथशब्दः॥ आदिपदं यो वै भूमा तदमृतमित्यादि
संग्रहार्थं। उक्तवाक्ये किं संशयमाह तत्रेति। निर्बीजे संशयेतिप्रसंगात्तत्र हेतुरिति कुत इति। हेतुं वक्तुं भूमाश
ब्दार्थमाह भूमेति॥ बहोर्भाव इति विग्रहे पृथ्व्यादिभ्य इमनिच्। मन्प्रत्यये कृते बहोर्लोपो भूच बहोरि
ति सूत्रेण बहोर्भू तस्य मन्प्रत्ययस्येकारलोपे बहोः स्थाने भूशब्दादेशे च भूमन्निति प्रातिपदिकं सिध्य
ति तस्य च भावार्थविहितमप्रत्ययांतत्वाद्बहुत्ववाचित्वमर्थः॥ तथापि संशये को हेतुरित्याशंक्य वान्तर
प्रकरणमहाप्रकरणं चेत्याह किमित्यादिना॥ तथा सन्निधानात्प्राणो भूमेति पूर्वपक्षः॥ भावनविद्यास्य
विवक्षया प्राणो भूमा परमात्मा भूमेति सामानाधिकरण्यसत्त्वाभ्यां कार्यसिद्धिफलमाह तत्रेति। आ
कांक्षापूर्वकं पूर्वपक्षं गृह्णाति किमिति पूर्वपक्षे प्राणोपास्तिः उत्तरपक्षे परमात्मधीरिति फलं॥ अवान्तर

४२ आ० प्रकरणस्य सन्निहितत्वेपि महाप्रकरण्यांशे पत्वेन दुर्बलत्वान्न प्राणस्य प्रमेयतेत्याह कस्मादिति महाप्रक
रणादयं तत्प्रकरणस्य प्राबल्यार्थत्वं। जगाद। स्यु इति। प्राणतुर्दृष्टमहत्तरार्थविषयत्वेन प्रश्नस्य प्रतिवच
नस्य वाद इत्यर्थः॥ अन्यत्रानुपभावे पि मेयमेदधी यत्रापि स्यादित्याशंक्यास्मिन्न- करणेतयोः सतो
रेवोर्थभेदान्यात्मेव मित्याह यथेति। इह विषयत्वेन विधेयं प्रश्नादिकमपि भिन्नं यत्स्यादिति॥ नन्वेष
तुयाऽतिवदतीति तु शब्देन प्राणविद्येति वादित्वं व्यावर्त्य- यः सत्येनातिवदतीति सत्येनातिवक्तुं वक्तुर प्राणमे
त्यमानमप्येतेनाह प्राणमिति॥ अतिवादित्वलिंगेन प्राणस्य प्रत्यभिज्ञानादेष इति प्रकृतादर्पणाल्लप्रकार
णाविच्छेदादतिवादित्वे सत्यशब्दस्य सत्यब्रह्मगुणाभिधायकत्वात्तु शब्दस्यापि नाम्नाद्याशंसवादिनोतिवा
दित्वाभावर्तकत्वात्प्राणं गृहीत्वेव सत्यादिद्वारा क्रमोऽवतारा तस्यैव क्रमतेत्यर्थः॥ प्राणपदेन लक्षणा वि
रोधं शंकते कथमिति। अवस्थादिविशेषमाश्रित्याह उच्यत इति। लोकप्रसिद्धा संज्ञा विलक्षणत्वात्स्य
तितपाचेति। गार्हपत्यो ह वा एषो पान इत्यादिनाग्नित्वेन निरूपितत्वात् प्राणा एवाग्नयो स्य पत्येत्वेचपु
रे शरीरे जीमानत्वो गृहीतेस्यापि विव्यापारं वंतोनवंतीत्यर्थः॥ यदा तत्राप्यातत्वेन लक्षणं तस्यास्त्वा
ध्यस्यादित्याशंक्य तथा चेत्यादियोज्यं। योवैभूमा तत्सुखमिति प्राणपदेन कथं निर्वचनमित्याह यत्रेति।
यस्यामवस्थायामेजदेवो बुध्याद्युपाधिको जीवः स्वमात्मास्वा वचाश्मोपजायते तदायं सुखं तदस्मिञ्छरीरे
भवति नो तस्यां तत्साध्यमित्यर्थः॥ सुषेन्स्य प्राणप्राधान्यात्तस्यैव तत्सुखमिति शेषः॥ भूम्नोम्
तत्वश्रुत्या प्राणादर्थान्तरत्वं प्राणस्याल्पत्वेनमर्त्यत्वादित्याशंक्याह यत्रेति॥ प्राणे भूम्नि विरोधं शंकते कथ
४२

मिति॥ प्राणस्यैवात्रात्मत्वान्न तद्विरोधस्तत्त्वात्याह प्राण एवेति॥ संग्रच तिमुख्येर्थं कि मित्यात्मशब्देन गौणार्थग्रहण
मित्याशंक्यसार्वात्म्याद्यात्मशब्दस्तत्र मुख्य एवेत्याह तथाहीति॥ प्राणस्य सर्वकल्पनाधिष्ठानत्वान्मुख्यात्मत्वमित्या
ह यथेति॥ तथापि परमात्मैव सर्वकारणत्वान्मुख्यो न्यमात्मा प्राणस्तु नैवमित्याशंक्याह सर्वेति। प्राणस्य सिद्धेनुपेय
त्वे तदुपास्तिपरं स्कन्न वाक्यमित्युपसंहरति तस्मादिति। पूर्वपक्षमनूद्य सिद्धान्तयसे वमिति॥ तत्र प्रतिज्ञां व्यापकरो
ति परमात्मेति॥ प्राणो नमे सुकृत्वात्तेनैयं प्रतिज्ञेति शंकते कस्मादिति। सोत्रं हेतुमाहरेसंप्रसादादिति। एष संप्रसाद
इति संप्रसादशब्दस्य जीवार्थत्वात्तत्रापि तस्मात्समुत्थानप्राणप्रसक्तिरित्याशंक्यास संप्रसादशब्दस्य विवक्षितं व कु
प्रसिद्धमर्थमाह संप्रसाद इति जीवेसुप्तोच शक्तिकल्पनायां [illegible] रदंशंकितो रुकं संप्रगिति। न केवलं निरुक्त्यास्य
प्रसादशब्दस्यापविषयः किंतु स एष संप्रसादोरत्वेत्यादि प्रयोगादपीत्याहत्वरूढिरिति॥ तर्हि स्वापादुपदेशस्त्वेतोन्य
स्य प्राणस्यापि स्यादित्याशंक्यावस्थावाचिशब्दस्य लक्षणया प्राणविषयत्वमाहतस्यांचेति। संप्रसादशब्दस्य जाद
णिकार्थग्रहे सिद्धं हेत्वर्थमाह प्राणादिति॥ भूम्नो धर्म्या कांक्षायां गे भ्रलयः सत्यस्याधिकारात्तदेवसंवध्यत इति भावः
प्राणे हेतोरयोगमाह। प्राणादिति। दृष्टान्तदाराउक्तं व्यनक्ति नहीति॥ अस्मिन्प्रकरणे यस्मादूर्ध्वं योनिर्दिश्यते स त
स्मोतिरिच्यते। प्राणाच्चोपरिष्टादुपदिष्टो भूमेति॥ सोपि ततो न्यः स्यादिति भावः॥ तत्र तत्रेति पर्यायत्रैहेतोः कि॥ हे
त्वसिद्धिं शंकते नन्विति॥ प्रतिवचन द्वारा प्रश्नकल्पनामाशंक्याक्षेपीति॥ स्वपक्षे पूर्वपक्षी हेतोः सत्वमाह प्रा
णेति। सिद्धान्ते हेत्वसिद्धिं निगमयति तस्मादिति॥ सिद्धान्ती हेतुसमर्थनार्थमाहात्रेति॥ तत्र परकीयं हेतुं निरस्य
ति नताबदिति॥ एषशब्दस्य यच्छब्द पारतंत्र्यान्न प्रकृतप्राणपरामर्शित्वमतो नान्तरं प्रकरणं विच्छिन्नमित्युक्ते

शंकते नन्विति॥ सत्यस्य प्रधानत्वाद्विशेषवादस्य तद्विषयत्वमेव न प्राणविषयत्वमित्याशंक्य कथमिति॥ सत्यशब्दे
यथा। श्रौतिकि वाची लिंगी रूत्पद्दृष्टान्तेन मत्वा हयपेति॥ तत्राप्यश्रुत्या साधकतमार्थयासत्यज्ञाने नातिशंवादि
त्वान्तर विधाना सं प्रकरणेन श्रुत्यर्थपरित्यागः स्यादित्याशंक्य नेति। श्रुत्यर्थमेव स्फुटयति श्रुत्येति॥ वाक्यम
त्रेत्युक्तमतिवादित्वलिंगमत्य विज्ञातत्वात्प्राणस्यैवाप्रतिपाद्यत्वे सत्यशब्दस्तदीयगुणविधायकः स्यादित्युक्तमि
त्याशंक्याह नेति। अतिवादित्ववाक्यसंसम्पर्थः॥ कातर्हि प्राणविज्ञानस्य प्रसक्तिस्तत्राह प्रकरणादिति संबध्ये
तातिवादित्वहेतुत्वेन विशेषः। प्रकरणस्य प्रमाणत्वात्तत्कृतो तिपिसंबन्धोनुरोद्धव्य इत्याशंक्याह तत्रेति॥ न परं
प्रकरणानुरोधेन तत्लीया श्रुतिर्विरुध्यते किंतु तुशब्दश्चेत्याह। प्रत्युक्तेति। न च लिंगोपेतं प्रकरणं श्रुतिमात्राद्बलीयः
लिंगस्यातद्विषयत्वात्के इतिभावः॥ यत्तु स सत्यशब्दस्य गुणविधिपरत्वं तन्न वाक्यान्तरविरोधादित्याह सत्यं
त्विति। तुशब्दे नोगविशेषविधिः। स्यूच्यते किं वा प्रकृतस्यावृत्तिरिति संदेहापोहार्थमिमाह तस्मादिति॥ अवान्तरा
धिकारविच्छेदादितिहित्यर्थः॥ प्राणदर्शनान्तरं सत्यप्रशंसितुं सत्यज्ञानेनातिवादित्वमुक्तमित्याह तादृगिति। अ
त्रतं प्राणाद्यधिकस्य भूम्नः प्रत्युक्तो नेतिलक्षाह नचेति। किं तर्हि कारणमर्थान्तरविवक्षायामित्याशंक्याह
प्रस्तुतेति। असति प्रकृतसंबंधप्रयोगे सत्तोरपि भूम्नतिवचनयोरर्थे कस्यैमत्रेव्यापारोदृष्टत्वात्तदभावेपि
प्रकृतसंबंधप्रयोगे तद्दृष्टस्य दर्शनात्सत्यशनादि सत्यमर्थान्तरत्वान्निमित्तमितिभावः॥ नापृष्टस्य कस्यचिद
यादितिस्यातेरप्रश्नेप्युक्तिरयुक्तेत्याशंक्याह नापिवोधयेनीयः शिष्यो जिज्ञासुरिति मत्वाह तत्रेति
सत्यामर्थान्तरविवक्षायामितियावत्तदेवाभिनयति यदिति॥ सत्यशब्दार्थोपि भूमापि परस्मादर्थान्तरमि

त्याशंक्याह तत्रेति॥ वाक्यसंसम्पर्थः॥ परस्मिन्ब्रह्मणि सत्यशब्दस्य प्रयुक्तपूर्वकत्वाच्च तद्विषयत्वेत्याह स
त्यमिति। तथापि विज्ञानमननश्रद्धानिष्ठाकृतीनामन्यतमो भूमा न सत्यं ब्रह्मेत्याशंक्याह तथेति। तेषां साधनत्वा
देव फलभूमतासिद्धिरित्यर्थः॥ तथापि कथं सत्यस्येव तथात्वमित्याह। तत्रेति। हेतूक्तिद्वारा भूमोपदेशे
प्रस्तुते सतीत्यर्थः। इहेतिवाक्योक्तिः। हेतुसिद्धिमुक्तस्य फलितमाह तस्मादिति॥ परात्मा भूमेत्यत्र महाप्रकरणम
नुगृहीतमिति हेत्वन्तरमाह एवं चेति॥ यत्तु प्राणविषयत्वमात्मशब्दस्योक्तं तदनूद्य दूषयति। प्राण इत्यादिशोकनि
वृत्तिवाक्यमिहेत्युक्तं। विशिष्टफलदृष्टेरपि परात्मैवात्मशब्दार्थो न प्राण इत्याह न चेति। नात्र मुख्यं शोकत
रणं किंत्वौपचारिकमित्याशंक्योपक्रमोपसंहारैकरूप्यान्मैवमित्याह। तमिति॥ उपक्रमे शोकस्योपसंहारे तम
सो निवृत्तिवचनाद्विप्रतिपत्तिमाशंक्याह तमइतीति॥ कारणनिवृत्त्या कार्यनिवृत्तिरूपसंहारे कार्यनिवृत्त्या कार
णनिवृत्तिरूपक्रमे विवक्षितेत्यविप्रतिपत्तिरित्यर्थः॥ किंच प्राणोपक्रमत्यत्तस्यैतस्य प्रकरणमित्यालेव
शं० प्रकरणी भूमेत्याह प्राणान्ते चेति॥ प्राणस्यान्यायत्तत्त्वं कुतोत्र सूचितं तत्राह आत्मत इति॥ प्राणाधिकारस
मासौ परात्मवचनात्पूर्वोक्तस्य भूम्नो न प्राणात्मेति शंकते प्रकरणेति। भूम्न एव सर्वनाम्नानुकर्षणाद्वा
क्यशेषे यस्यापि तदर्थत्वात्तस्यैवेदं प्रकरणमिति न प्राणस्य भूमत्वमेतत्याह नेत्यादिना। किंच भूमरूपतापि प्राणे
न मुख्येत्याह वैपुल्येति॥ प्राणस्य स्वविकारापेक्षया भूमत्वेपि न मुख्यमिति विवक्षुरुत्तरमित्युक्तं॥ परो
भूमेत्यत्र लिंगान्तरमाह धर्मेति॥ स्वं व्याकरोत्यपि चेति॥ उपपत्तिं दर्शयितुं भूम्नि दर्शनाद्यभावं
दर्शयति यत्रेति॥ कथमेतावता परात्मधीस्तत्राह॥ परात्मनीति॥ प्राणे वित्तदुपपत्तिरुक्तेत्याशंक्या

ह्यपीति ॥ उक्तोऽनश्नुत इति स्यादिने ति विशेषः ॥ प्राणस्वभावविवक्षया तस्यानुक्तत्वे हेतुमाह रूपस्मात्वेति ॥ तत्स
करणेनश्नुते ह्यणोतीत्यादेरुक्तेरित्यर्थः ॥ स्वप्नजागरितयोः सति मनसि दर्शनादिव्यवहारात्तदभावे स्वापे तदभावा
दन्वयव्यतिरेकाभ्यां मनोधीनो दर्शनादिनामकलः ॥ सत्त्वस्य तोसेग इति मत्वानश्नुतोत्योतीत्यादिना सर्वव्यवहारा
भावः सुषुप्तावुक्तो नमृप्ये विवक्षयापरप्रकरणविरोधादित्यर्थः ॥ नन्वात्मनः सुखत्वं भावोपि स्यादित्युक्तं प्रत्याह
यद्यपीति ॥ तस्य सुखत्वे मानमाह यत इति । इतश्चात्मन एव सुखत्वमित्याह हेत्वपीति । तस्यैव सुखत्वं प्रतियोगिप्र
त्युक्तास्फुरत्यतीति नेति । उक्तमेवार्थमाह सामयेति । आमयेति ॥ आमयेन दुःखेन सहितं सामयं धर्मद्वयमुक्त्वा
धर्मान्तरमाह तथा चेति । आत्मस्यापि दर्शितममृतत्वमित्याशंक्याह विकारस्येति ॥ इतश्चान्नायस्यमु
रणममृतत्वमित्याह तत इति । आर्तमार्त्तिग्रस्तं नाशीतियावत् ॥ प्रकृतोपयुक्तानि धर्मान्तराण्याह तथेति ॥ स ए
वाधस्तात्स उपरिष्टादित्यादिना सर्वगतत्वं स एवेदं सर्वमिति सर्वात्मत्वमुक्तं । श्रुतिलिंगप्रकरणेभ्यो ब्रह्मापर
मात्मेति तत्रेतिपदस्यार्थः । तमेवार्थमुपसंहरति तस्मादिति । अविकृतधर्माणां परस्योपपत्त्या परो ब्रह्मेत्युक्त
मधुनाति नैव न्यायेनान्तरेऽक्षरं तदेव गार्गि धारणस्यापरस्मिन्नुपपत्तेरक्षरं परं ब्रह्मेत्याह तदक्षरमिति ॥ वृहदार
ण्यकवाक्यमेव तु ति कस्मिन्निति ॥ यदूर्ध्वं दिवो यदवाक् पृथिव्या यदन्तरा द्यावापृथिवी इमे यद्भूतं
च भवच्च भविष्यच्च तत्सर्वं कस्मिन्नोतं प्रोतं चेति । प्रश्ने याज्ञवल्क्येनाकाशे तदोतं च प्रोतं चेति निरस्ते गार्गी पुन
रपृच्छदाकाशो व्याकृतारव्यः कस्मिन्नोत प्रोत इति तेन तिष्ठतीति याज्ञवल्क्यस्त्वाह हे गार्गीत्यादि एतन्मात्रकाशस्या
धिकरणं तदेतदक्षरमस्थूलादिविशेषणं ब्रह्मविद्वदन्तीत्युदाहरणार्थः ॥ उक्तयत्राक्षरशब्दप्रयोगप्रतीत्या

संशयमाह तत्रेति ॥ सत्यक्षरशब्दस्य ब्रह्मणि मुख्यत्वात्परो ब्रह्मेत्युक्तत्वादत्राप्यक्षरशब्दस्य वर्णे मुख्यत्वादोंकार
एवाक्षरमिति पूर्वपक्षयति । तत्रेत्यादिना । अक्षरस्य ब्राह्मणस्य निर्विशेषब्रह्मण्यन्वयोक्तेः । संगतयः ॐकारोपा
स्तिः ब्रह्मधीरितुप्रयत्नफलं । नन्वक्षरमित्येव पदप्रसिद्ध्यापरस्मिन्नपि शब्दोपपत्तिमाशंक्य रूढिर्योगम
पहरतीति न्यायेनाह रूढप्रसिद्धेरिति । वर्णपक्षे तत्स्याम्बरान्तधारणायोगात्पूर्वपक्षत्वावतव्याख्याने ब्रह्मवदाग्रहमित्याशंक्याह
ह्यों ॐकार इति । उपास्तिद्वारा पुमर्थत्वे । खमित्येवाभिधेयस्याकोरयंवद्वोयमिति शब्दसामानाधिकरण्याच्च माग्निवत्पु
पायोपेयतामात्रेण तद्योग्यता पूर्वापेलिंगमुक्तज्ञानेनामसंबन्धे हेतुभूतानामभिधेययोरैक्याद्योङ्कारमात्रताया
श्च सर्वस्य श्रुतत्वात्तदुक्तिरित्यर्थः ॥ रूढेरिदं ब्राह्मणमोंकारोपास्तिपरमित्युपसंहरति चेति । वर्ण इति पूर्वपक्षम
नूद्य सिद्धान्तमवतार्य प्रतिज्ञां व्याकरोत्येवमिति । रूढेरोंकारविषयत्वेनोंकारोपास्तिपरमित्युपसंहृत्य रूढवि
मत्क्षरशब्दस्योक्तं तत्कथं प्रतिज्ञेत्याह कस्मादिति ॥ हेतुमुक्त्वा व्याकरोत्यम्बरान्तेति ॥ आकाशस्येव प्रश्नश्रव
णात्तदधिकरणं प्रष्टव्यं न पृथिव्यादेरित्याशंक्याह तत्रेति ॥ तथापि रूढिर्योगाद्बलीयसीत्युपात्तमित्याशंक्याता
त्पर्यवदम्बरान्तधृतिलिंगसंगतापि योगवृत्तिर्बलीयसीत्युपेत्योपक्रमोपसंहारयोरेकरूप्यावगमात्तात्पर्यसि
द्धिरित्याह तथा चेति । लिंगलिंगस्यान्यथासिद्धिं प्रत्याह न चेति ॥ ॐकारस्य सर्वमित्यश्रुतेस्तत्र संभवति लिंग
मित्याशंक्याह यद्यपीति ॥ स्वरूपतो ह्युपायोपेयत्वेऽप्यर्थक्रियान्ते ... शब्दापर्यायो रस्ते दो । दासिद्धि
रित्यर्थः ॥ प्रकृतेऽक्षरे योगस्य बलीयस्त्वे फलितमाह तस्माच्चेति ॥ उक्तमक्षरं प्रत्याह स्यादिति ॥ के ।
यमंबरान्तधृतिस्त्रिमिरात्वं । तदुपादानत्वं वानाधः घर कुलालवदाश्रयाश्रयित्वायोगात् द्वितीये त्वस्ते

५ आ०

भिचाराद्साधकत्वेतिमत्वाफलितमाह कथमिति॥ सूत्रमवतारयस्तस्यैति। प्रतिज्ञांव्याचष्टे साचेति। प्र-
धानस्यापि तदुपपत्तेरुक्तत्वादवधारणासिद्धिरित्याह। कस्मादिति। हेतुमुक्त्वाप्यनियमं साधयति प्रशासनादि-
ति। अक्षरस्य सूर्यादिप्रशासनं श्रुतेपि कथमीश्वरत्वे तत्राह प्रशासनं चेति॥ तस्यास्य या सिद्धिं धुनीतेत्येति।
तस्यापि स्वकार्ये प्रशासनं सिध्यति नेत्याह नहीति। तथा चात्तारव्य प्रशासनलिंगान्नप्रधानं न मत्तरमित्यर्थः॥ ई का-
दिनिरासेन ब्रह्मलोपदाने हेत्वंतरमाहान्येति। प्रतिज्ञां सूत्रे योजयति अन्यभावेति। हेत्वर्थं तत्वर्थं प्रश्नपूर्वकमाह
किमित्यादिना। अन्यभावव्यावृत्तीदारस्याभावत्वं विधेयमिति। श्रमव्यावृत्त्यर्थमभिप्रेतमर्थमाहेतदिति।
प्रधानमन्यदित्युक्तं। इहेति प्रकृतोदाहरणे। प्रधानस्यापि रूपादिराहित्याददृष्टत्वादियोगादुक्तश्रुतोकुतोऽच्च-
रस्यतत्तोव्यावृत्तिस्तत्राह तत्रेति। एतेनसूत्रेणाक्षरत्वं जीवस्यापि निरस्तमित्याह तथेति। अक्षरमतःश्र-
ब्रार्थः। इतश्च जीवस्य नाक्षरशब्दतेत्याह चक्षुषमिति। उपाधिसंबंधनिषेधेपि तद्धतोनिषेधोभावाद्युक्तं त-
स्याक्षरत्वमित्याशंक्याह नहीति। अनन्यथासिद्धलिंगसंभियोगवत्ताज्ञेयब्रह्मपरमक्षरमालाणमित्युपसंह-
रति तस्मादिति॥ ईक्षत्यस्याक्षरत्वेन पूर्वपक्षे बुद्धिस्थान्निध्यानं तेनध्यातव्यं पुरुषं निरूपयति। ईक्षतीति
अपवर्गवाक्यं पठति एतद्धेति। पिप्पलादो नामाचार्यः सत्यकामेन पृष्टश्चात्र हे सत्यकाम परं निर्विशे-
षमपरंच कार्यं यद्ब्रह्मलवंदेतद्व्यवयोपमोकारः स्मृतिमिव विशेषस्तस्य प्रतीकस्तस्मात्सोणवं ब्रह्मलाभना
विद्वानेतेनोंकारध्यानेन प्राप्तिसाधनेन परापरयोरेकतरं यथाध्यानमनुगच्छतीतिप्रक्रत्यैकमात्रद्विमात्रो-
पास्तिं दर्शयीत्वां ब्रवीतीति। यः पुनरोमित्येतदक्षरं त्रिमात्रमिति तृतीयाद्वितीयात्वेनैनेपात्रयोंकार नेदो

५

पक्रमात्तथा त्रिविधपदार्थस्य सूर्यलोकं परं ध्यायितस्स सूर्ये प्राप्तः सामभिर्ब्रह्मलोकं प्रतीतनियत इत्युदाहृत्यार्थः
सन्निमित्तं संशयमाह किमिति। अक्षरस्य कस्य वर्णेरूपस्यापि तुल्यायतनत्वलिंगेनोनन्यथायोगवृत्तिराश्रितात-
थादेशपरिच्छिन्नफलश्रुतिलिंगेन परशब्दस्यापेक्षिकपरत्वविशिष्ट हिरण्यगर्भे वृत्तिरिति पूर्वपक्षयति त-
त्रेति। उक्तश्रुते ध्येयं ब्रह्मणि सम्बन्धयोः संगतयः अपरस्य परस्य वा ब्रह्मणो ध्यानं पूर्वोत्तरपक्षयोः फलं॥
ननु परापरत्वेन ब्रह्मविभज्य परमभिध्यायीतेति विशेषोक्तौ कुतः शंकेति शंकते कस्मादिति। परायोगि-
फलो स्त्याशंकायाः सावकाशत्वमाह स इति। उपासकः स च नामार्थः। कुत्र यथा कौफलं परं स्मिन्न संभावि-
तं तदाहनहीति। तद्विशेषापितथाभावाद्विशेषः विशेषणानुपपत्तिं शंकते न चेति। तदुपपत्तिमाहनेति॥
पिण्डस्थूलो देहः प्राणः सूत्रात्मा अपरब्रह्मलोपास्तिपरं वाक्यमितुपसंहरति मिति। शाब्दं पूर्वपक्षमनूद्य सिद्धा-
न्तयति एवमिति। तत्र प्रतिज्ञा पूर्वयतिपरमेवेति। लिंगत ध्यायतेरपरविषयत्वोक्ते नियमासिद्धिरित्याह क-
स्मादिति सोः त्रेहेतुमाह ईक्षतीति। ईक्षतेर्धात्वोर्ध्वात्मेव कर्मत्वव्यपदेशाच्चापेक्षित ध्यधीरित्याशंक्याक-
रोतीद्यतिदिति। तथापि तदेव क्रियात्वात कर्मेति भ्रांतिं प्रत्याह दर्शनेति॥ तस्य व्यपदेशादित्युक्तेः पक्षधर्म-
तासिद्धिमाशंक्यापेक्षितं पूरयन् विवक्षितमर्थमाहेक्षतीति। ईक्षणाविषयत्वेनवाक्यशेषे निर्दिश्यमानम-
पि ब्रह्मापरमेवेत्याशंक्याह तत्रेति। ईक्षतिध्यायस्योर्निर्धारणार्थ सप्तमी। रज्जतादिदृष्टेरान्यास त्वात्तथा कृतमे-
वेत्यवध्रियते अतएव दर्शनविशेषणं सम्यगिति॥ अस्तु तर्हि दतिकर्मणाप्यस्येव ध्येयत्वमित्याशंक्यसो-
त्रेसः शब्दं व्याचष्टे स एवेति। निर्देशवैशेष्यान्नप्रस्मिन्नेति। शंकते नन्विति वैषम्यमुपेत्य प्रस्मिन्नोपपत्ति

२८

ओं॰

माहाश्चेति॥ एतच्छब्दस्य प्रकृतगामित्वात् ध्यायतिकर्मणश्च प्रकृतत्वात्तस्यैवैतच्छब्दस्मात्ताधिलक्षणं च यं
तपरशब्देन प्रत्यभिज्ञानात् अभिध्यातव्यविषयपरशब्दस्य वाक्यशेषे जीवघनविषयत्वाज्जीवघनोऽभिध्यातव्यः
तस्मात्परात्परः परमेश्वरोऽन्य एवेक्षतिकर्मेत्यत आह नचेति॥ योध्येयः स एव तदुक्तः सम्यग्धियोपीक्ष
णस्य विषयः संभवत्येकवाक्यत्वे वाक्यभेदस्यायोगादेतच्छब्दस्य संनिहितपरामर्शित्वेपि संनिहितत्वरजी
वघनविषयत्वाज्जीवघनशब्दस्य ध्येयविषयत्वान्यायात्तस्येक्षितव्यस्य विकल्पत्वपर्थः॥ उपक्रमोपसंहाराभ्यां यो
क रेकदा वाक्यतात्पर्यमुपक्रमे यो ध्यातव्यः स एवोपसंहारेपि द्रष्टृगोचरश्चेत् तर्हि जीवघनशब्दस्य पर्यायोपि वक्त
व्यो नहि जीवघनपदं प्रमत्तमितिशंकते॥ कस्तर्हीति॥ मूर्त्तो घन इति स्वत्वेण हीनसंघात इति षष्ठीसमासं व्यावर्तयति
जीवेति॥ उक्तमर्थं दृष्टान्तेनाह सैंधवेति खिल्यभावो ऽस्पष्टं॥ कथमनवच्छिन्नस्य परस्याल्पत्वं तत्राह उपाधीति त
त्र पंचम्यन्तपरशब्दोपपत्तिमाह परश्चेति॥ एतच्छब्दस्य प्रकृतपरामर्शित्वमाश्रित्य पक्षान्तरमाह परइति॥
कस्याक्षरस्याजीवघनशब्दो ब्रह्मलोकं करोते तत्राह जीवानामिति॥ परिच्छिन्नकरणावच्छिन्नानामनवच्छिन्नकरणा
त्मनि हिरण्यगर्भे ऽन्तर्भावात् तस्य जीवघनत्वं तथयात घनत्वं त्वात्त लोकोपि जीवघनत्वमुपचर्यत इत्यर्थः॥
तस्य कारणत्वात् परस्मात् परस्तस्माद्दिव्यात् तस्मादिक्षितं ईक्षण ध्यानयोः कार्यकारणभावादेकविषयते
त्याह स एवेति॥ परस्यैव ध्यातव्यत्वे विशेषणामनुकूलयति परमिति॥ विराडपेक्षया परत्वं स्तुत्येपीत्यु
क्त्वा मांशंकामुख्यपरत्वमुपस्यन्तोऽन्यलक्षण्येवेत्याह परोहीति॥ यस्मात्परं नापरमस्ति किंचिदिति श्रुत्या परमा
त्मानं विशिनष्टि यस्मादिति॥ ईश्वरस्य परमपुरुषार्थत्वमानमाह पुरुषादिति॥ पराच्च ब्रह्मणो प्रकृतस्य

रश्चब्देना परस्य व्यावर्त्तनादपि परमेव ब्रह्म ध्यातव्यमित्याह परं चेति॥ न केवलमुपक्रमादेवं किंतु फल
तोपि स्यादित्याह यथेति॥ पादोदरः सर्पः॥ पूर्वपक्षबीजमनुष्ठूषयति अयं त्वादिना॥ परिच्छिन्नब्रह्मलोकस्थानदेशप
रिच्छिन्नफलसमभ्युत्क्रेऽकारोपाधिब्रह्मोपास्तौ तत्किरूदमित्यर्थः॥ कथं तर्हि पुरुषमीक्षत इति तत्राह क्रमेणे
ति॥ ब्रह्मलोके सम्यग्दर्शनोत्पत्तौ मोक्षं विवक्षितेत्येक्षतिवाक्यमित्यर्थः॥ एकवाक्यता कांक्षिता प्रकरणानुग्रहीत
श्रुतिप्रबलत्वात्स्यादेशपरिच्छिन्नफलत्वलिंगमनुगृहीतप्रत्यभिज्ञातो बलीयस्त्वात् ध्यातव्यं परमेवेत्युपसंहरति
तदेतदिति॥ पुरुषमित्यादिवाक्यात ध्यातव्यपुरुषनिर्णये परस्य बुद्धिशय्यमिति पुरसंबंध
सिद्धिस्य मपि पुरस्तं बंधी दहराकाशो ब्रह्मेत्याह दहर इति॥ छांदोग्यवाक्यमुदाहरति अथेति॥ क्रमविधान
त्तरं प्रविधांतरारंभार्थो यः शब्दः॥ यदिदमिति प्रसिद्ध रूपं पराम्रष्टमस्मिन्निति प्रत्यक्षत्वोक्तिः॥ ब्रह्म
पुरं शरीरं दहरमल्पं पुण्डरीकं तत्पद्माकारत्वात् ब्रह्मतेऽस्य वेदमे तत्त्रयस्य निलसंनिधेर्वेश्मशब्दः संनि
हितं हृदयं सत्तमापयंरामस्य तस्यातिसत्त्वस्य परस्पतत्त्वस दात्स्थितिं स्वच्छ यदन्वेष्टव्यं तमेव विशदयति
दहर इति॥ अव्वहित नपि हृदयं योग्यत्वात् ह्रदेनोक्ता तदेतराकाशस्य विचार्यतां ज्ञेयतां च दर्शयति तस्मि
न्निति॥ तस्मिन्निति सत्यमा हृदयौके अस्तरंतः स्थं दहराकाशमन्वेष्यं जिज्ञास्यं च किंवा तस्याः संनिहिके
ततर दहराकाशार्थत्वात् तदंतः स्थं किंचिद्विष्णुज्ञेयमिति संशयं सूचयति॥ तत्रेति॥ वाक्यं सप्तम्यर्थः
य दाकाशोभिव्यक्तेयस्तदापासंसंशयमाह स इति॥ द्वितीयसंशये प्रश्नपूर्वकं हेतुमाह कुत इति॥
द्वयोरपि पदार्थयोपनायकत्वं व्यावर्तयत्याकाश॥ शब्दाधीनं पक्षद्वयमाह आकाशेति॥ शब्दान्तरात्प

७ आ॰

त्र दयमात्रि मा हत्थेति॥ इतिशब्दः संशयशब्देन संबध्यते॥ नन्वयमन्य संशयोन प्रत्रत्तस्त्वान्यादृशत्वात्
त्वात् तत्राह तत्रेति॥ उक्ते संशये सतीति यावत्। परपुरुषशब्दस्य ब्रह्मणि मुख्यत्वात्। ब्रह्मैव ध्येयमित्युक्तं
इहाप्याकाशशब्दस्य भूताकाशे रूढत्वात् स्यैवोपास्यतेति पूर्वपक्षमाह तत्रेति दहर॰ याकाशस्योपाधिके ब्रह्म
णपन्वयो कौतत्र प्रवत्तस्य निरुपाधिकं कुत्र समानस्य तस्मिन्प्राज्ञापलब्धा कान्यो केः संगतय॰ पूर्वपक्षे भूता
काशादि ध्यानं सिद्धान्ते परोपास्ति द्वाराप्रतिपत्ति विति फलं॥ न चाकाशस्त लिङ्गादिलमेन गतत्वात् पूर्वपक्षा
नुत्थानं। तत्र वाक्यशेषस्थलिङ्गानाम् आकाशविषयत्वात्त्यन्तते तेषां तदन्तस्थ विषयत्वेन तद् विषयत्वादिति॥
ॐ उपास्त्यर्थं ब्रह्मणो दहरत्वेपि भूताकाशस्य तद् योगात्कुतोय हर्षोत्तत्राह तस्येति। तद्यानेनापि वाक्यशेष
स्थ फलं संपद्यते वाक्यादित्यर्थः॥ सतिभेदे सादृश्ये चोपमा नोपमेय भावादेकत्र तदसिद्धिरित्याशंक्याह यावानि
ति॥ ब्रह्मणि धावा पृथिवी नामैत्तस्य माधनं कारणत्वात् तदन्त वा दाकाशेनैव नित्याशंक्याह धावापृथिवी
त्यादिति॥ दहरे कथं तत्समाधानं तत्राह स्यवका शेति॥ अपहतपाप्मत्वादि तस्मिन्नित्यानु वाद स्सत्यकाम
त्वादि ध्यानार्थमभ्यस्त मिति भावः॥ एवमात्मत्वात्त शब्दसामंजस्यार्थेपक्षान्तर माहाथवेति॥ ब्रह्मशब्दस्या
मुख्यत्वात् जीवेन तथ्य दृष्ट्वा त्वर स्मिन् दृष्टेति बुद्धिस्थ कुतो जिज्ञासि रित्याशंक्य मुख्यसंबंधस्य तत्रैव संभव
वादित्याह। जीवस्येति। तस्यापि पुरेण कः संबंधस्तत्राह तस्येति॥ तथापि तस्मिन्नौपाधिके कथं ब्रह्मपदं त
त्राह न्यत्तेति॥ चैतन्यगुणयोगेनेत्यर्थः॥ जो यामुख्य योमुख्यसंप्रत्यय माशंक्योक्तं नहीति॥ कार्यकारणसं
बंधस्यासाधारण्याद्साधारण्येप्यस्तु संबंधाह ॥ न व्यपदेशाज्जीवकर्मार्जितं शरीरं तेनैन व्यपदेश मित्यर्थः

७

तस्य जीवपुरत्वेपि राजपुरोपेव सद्म वत् पुण्डरीक दहरं गेहं ताब्रह्मणोस्तु तत्राह तत्रेति। वेश्मन इव ब्रह्मा
धारस्याधेयापेक्षायां पुरस्वामिनाधेये नसंबंधस्त्वान्यापेक्षे त्यर्थः॥ जीवस्यदेहेन विशेषसंबंधोपि॥ हृद
येनतद्भावात्कथं तस्यैवत देशत्वात्तत्राह मन इति। तस्यापि चंचलत्वान्नगे हृदये नासंसाधारण्यं तत्रा
ह मनश्चेति॥ तथापितस्य सर्वगतस्य कुतो दहरत्वं तत्राह दहरत्वमिति। दहरत्वाद्धि तर्हि नाकाशो पमितत्वा
दीत्याशंक्याह आकाशेति। यद्भावमपेक्ष्य तत्फलत्वाते तदेव ब्रह्माकाशशब्दं लाभवादित्याशंक्याह घेसंशये पूर्व
पक्षमाह नचेति॥ परविशेषण ज्ञत्वेनेत्य चपरो दहराकाश उपादानात्तस्मिन्निति स तस्य तत्तछब्दस्यैति शे
षः॥ यवापरशब्दोक्तस्य वस्तुस्तु विषयस्तद्विशेषणात्वेन तस्मिन्निति दहराकाशस्योक्तेरित्यर्थः॥ तच्छब्दस्य
सं ९ निकृष्टान्वयेन विप्रकृष्टान्वयस्य जघन्यत्वाद्दाकाशोर्क्तं तं ध्येयमिति भाव॥ भूताकाशस्य जीव।
स्य वा दहराकाशान्तःस्थस्य वा ध्यानार्थं दहरवाक्यमुपसंहर्तुमिति शङ्का सिद्धान्तयत्येव इति॥ तत्र प्रतिज्ञां व्या
चष्टे परमेश्वर इति। प्रतिज्ञायां प्रश्न द्वारं हेतुमाह॥ कस्मादिति। नानेवादि ब्रह्मोति तदाहीति। विहितस्य
तस्य दहरत्वे सर्वमित्यादिने ति शेषः। आकाशस्याक्षेप पूर्वकमिति सर्वं पञ्चलक्ष्यत्वार्यं प्रतिशिष्याः यदि श्रुत
स्त्वाक्षेपमुपक्रम्याबेवतार्यति योजना। आक्षेपप्रकाशेरमाह किंतदिति॥ पुण्डरीकं वेश्मता वत्यम त्यत
रं च तदन्तर्गताकाशं तथा च किंतदत्र वात्पल्येस्तीय छ्कृ ति युक्तिस्यान्वेष्यय द्वाव तात्त्वा तत्वमितत्व
त्व ताद्दोष जा दहरस्य ज्ञेयत्वमाक्षिप्य समाहितमित्यर्थः॥ तदेव दर्शयतिस इति आचार्यः॥ सर्वनामार्थः॥
अस्मिन्निति हार्दाकाशोक्तिः॥ उभावग्निश्च वायुश्चेत्यादिसंग्रहार्थमादिपदं॥ तस्य विवक्षितमर्थमाह हत

४८ आ.

चेति। निवर्त्तयन्निति। चार्योगृह्यते।। आकाशशब्दस्य भूताकाशे रूढत्वात्तस्यानुपपत्त्या तन्निवर्त्तनं तत्राह उप
पीति। परोक्तिं स्मारयति त्वमिति रस्यपतिनन्वित्यादिना।। गर्त्तेतरानाव। परोऽपि सन्नेदं नोपमानस्य काचित्क्षतिरपि
सत्वांगतोतदसिद्धिरित्यर्थः।। साऽदृश्येऽसत्युपमानोपमेयत्वं दृष्टं न चोपाधिपरिच्छिन्नांतराकाशस्य महत्परिमा
णेन बाह्याकाशेन सादृश्यमपमित्याह। पि श्चेचेति।। तर्हि परस्यापि भूताकाशे नोपमानं न महत्परिमाण
त्वादित्याह नन्विति। नेदं वाक्यं भूताकाशतुल्यत्वं विधेयं किंतु शंकिताल्पत्वनिवृत्ति परमित्याह नेति। निव
र्त्तितावत्त्वे च वाक्यतात्पर्यमाशंक्येकं नयति। न च संनवत्वेकवाक्यत्वे नेदं न च तावत्त्वमेव प्रतिपाद्यमप्र
त्वान्न च शंकितदहरत्वनिवृत्तिरेव फलं तत्रैव वाक्यतात्पर्यप्रसंगान्न न साक्षादेव तात्पर्यात् अर्थिकत्वक
ल्पनायुक्तेति भावः।। भूताकाशाग्रहे लिंगान्तरमाह न चेति। तत्रैव हेत्वन्तरमपइति। किं तात्विश्वस्य
दितु पिच्छायस्य सततमां चकारादुक्तं सर्वभूताकाशस्यैकदेशे नोपपन्नत इति संबंधः।। तदेकस्य स्याति।
आत्मेति।। न तावद्भूताकाशे संभवस्यात्मत्वं। अचेतन्याच्च चापहतपाप्मत्वादेर्नित्यानुवादत्वेन विसत्य
कामत्वादेराशेषि तत्त्वेन च आगतिकाहार्यंगतिरूपक्रमस्याकाशश्रुति। श्रोपसंहारस्थानां श्रुतिरुक्तलिं
गसंगतावलीयसी प्रत्यपसंवादादित्याकाशपदं बाले चेति भावः।। आकाशोपमितत्वादिहेतुत्वे क्तो
नाकाशं निरस्य तद्ब्ला दपजीवम पि निरस्यतियधपीति।। ननु कथमाकाशोपमितत्वेन जीवाशंका नि
वर्तकं तस्यापि तदुपमितत्वेन श्रौकितदहरत्वनिरत्वोपमानपर्यवसानात्तत्राहन्नरीति।। तादात्म्येन
शंकते।। ब्रह्मेति।। आदिपदं सर्वाधारत्वादिसंग्रहार्थं लाघवेन प्रत्याहयदिति।। ब्रह्मपुरे दरशब्दा। जी

४८

वोपादानमुक्त। मनुवदतियद्यपीति।। प्रथमश्रुतब्रह्मशब्देन चरमश्रुतविचित्रस्य येनितव्यइत्यस्य चेति।। ब्रह्म
पः।। पुरमित्यत्र स्वस्वामित्वं षष्ठ्यर्थः हित्वा ब्रह्मशब्दो मुख्यार्थः स्वास्वी कर्तव्यः प्रत्ययार्थस्य प्रकृत्यर्थापेक्ष
स्य दौर्बल्यादित्यर्थः।। ननु ब्रह्मपदस्य प्रत्ययस्य शरीरे वनत्वमेव जीवपदस्य प्रकृत्यालंबनं काचिदस्ति तदर्थ
स्य ब्रह्मत्वमेतत्राहतस्येति।। ब्रह्मणः शरीरमुपलब्ध्यधिष्ठानमित्युच्यमानमाहस्येति।। सर्वासु पश्यतीति।
व्यपदिश्यपुरीशयइति विशेषणं हृदयसंबंधविवक्षायां नेयं।। आदिपदं यो वेद निहितं गुहायामित्यादिसंग्र
हार्थं। ननु शारीरः शरीरमन्नपानाभ्यां वहत्वेन चंदृश्यतीति।। तस्मिन्मुख्यं ब्रह्मत्वात्तस्य चस्वकर्मार्जितत्वा
दसाधारणं शरीरं तथा च प्रकृतिप्रत्ययोर्जीवमुख्यावितितत्राहाथवेति।। शारीरसंबंधेमेव वेश्मोत्तरहेतु
स्योब्रह्मण्यपि संबध्यते दृष्टं हि राजपुरे मैत्रस्य वेश्मेत्यर्थः।। किंच कर्मफलनित्यतानिवृत्त्यादहरज्ञानस्यानं
तफलत्वश्रुतेर्दहरस्य परत्वमित्याहतद्यथेति। कर्मजितस्तत्फला च्छ्रोपेक्षानंतर्यमथशब्दार्थः।। इहजीवत्येन
देहेऽदहरमात्मानं तदाश्रितांश्च सत्यकामादिगुणानाचार्योपदेशमनुविद्यानुभूयपरलोकं व्रजंति ते
षां सर्वेषु लोकेषु कामचारः स्वेच्छयाचरणमपरतिहतमनंतमैश्वर्यमित्यर्थः।। श्रुतितात्पर्यमाह भवतो।
ति। वदन्नित्याचार्यविदोबो। क्रः।। दहराकाशस्यान्वेष्यत्वादिसिद्धौ तत्र विचारो न तु तदस्ति तस्मिन्यदंत
रिदं तं तस्य विशेषणत्वादन्वेष्यत्वादेरितित्राहयद्यपीति।। उत्तरस्त्राकाशस्वरूपप्रतिपादनानुपपत्त्या
तस्य शेयत्वमंतरस्थाकृतेस्सहेष्ट मिस्यावेति।। तत्रतिपादनमस्यापपन्नमितिशंकतेनन्विति। कथ
मेतदवगम्यतेतत्राहतमिति। किंतदत्रेत्याक्षेपाद्युक्ते।। स्मिन्निति चांते।। स्तुत्वस्तुत्त्वासमाधानाधारत्व

आ॰ मेवाकाशस्येत्यर्थः॥ तस्याधारमात्रत्वविवक्षया माधेयस्येव ध्येयत्वं स्यादित्याशङ्क्येतदिति॥ अस्तु को दोष
स्तत्राह। तत्रेति॥ दहराकाशस्य प्रकृतस्येतच्छब्देन परामर्शात्तद्देहेस्य फलवत्त्वश्रुतेस्तस्यैव ध्येयत्वं न
चैतच्छब्देन द्यावापृथिवीभ्यां व्यवधानाद्वाकाशाकर्षयामस्मिन्नेव इति चैकवचनात्तस्यैव परामर्शयोग्यत्वा
दित्यर्थः॥ सत्यकामत्वेदतस्येतत्फलं तत्सत्त्यर्थः दहराकाशगुणे इत्याशंक्याह समुच्चयेपि संदिग्धस्य
वाक्यशेषान्निर्णय इति न्यायादेतस्मिन्नित्यन्तरिति॥ तच्छब्देनांतरमप्याकाशमजिज्ञासुस्तु पुण्डरीकं परामृ
शति। तत्र यदंतराकाशं तदन्वेष्टव्यं विजिज्ञासितव्यं चेति लिंगप्रसंगात्तलस्यादिति॥ नन्वेतच्छब्दस्य
संनिहितार्थत्वाज्जीवाप्रत्यक्सर्वान्प्रति संनिहितत्वात्तस्यैव तादर्थ्यं कामानां चतत्र। समाहितत्वेन समुच्च
यसिद्धेस्तस्य परं। आकाशमित्याशंक्य विजातीयाध्याहात्कृदिसिद्धजीवात्सजातीयश्रुतिसिद्धदहराकाश
स्य परमात्मपरामर्शलाघवाज्जीवेनापहतपाप्मत्वाद्यसंभवात्तस्यैवमित्याह सचेति॥ दहरा
काशस्येश्वरत्वेऽप्यन्तरमाहगतीति॥ उत्तरसूत्रसंदर्भस्य परमसंगतिमाहहरदरइति॥ अवतारितसूत्र
स्यावांतरसंगतिमाह इतश्चेति॥ इतःशब्दार्थमाह यस्मादिति। तानेवोदाहरतीमा इति॥ प्रजाभिर्वा नामा
जीवा अहरहः स्यापेक्षतर्हि पुनरुक्तानंतचाहेतदिति॥ उक्तं गतिशब्दयोर्विवक्षितमर्थमाह तत्रेति॥ श्रुति॥
सप्तम्यर्थः॥ एतच्छब्दात्तज्जीवानां स्वापे दहरगमनेपि तस्य ब्रह्मलोके कि मायातं तदाह तथाहीति॥ अध्या
यक्षेद्धियाश्रुत्यंतरशब्दस्वमपीतो भवतीत्यादिवाक्यमादिपदार्थः॥ तथाहीत्यादिसूत्रावयवस्यार्थपर्यन्ति
रमाह लोकेपीति॥ प्रसिद्धेः श्रुतिमूलत्वात्प्रामाण्यपाख्ता दहरायत्वेपीदृशी नामेयं वैदिकी प्रसिद्धिरियं

लोकेप्यस्तीति श्रुतिप्रामाण्यदार्ढ्यायतदुक्तिरिति। मत्वा किंलेखुक्तं॥ दहरस्य ब्रह्मत्वधीहेतुतां गतेरु
क्त्वा शब्दस्यापि कथयतितस्येति॥ गतिवदित्येतत् शब्दस्यापि सिद्धो न्वानुपपत्तेरिति शंकते न। अन्वितीति॥ प
चितत्त्व श्रुतेस्तदर्थलक्षणायां गौरवाच्चास्य। लोकार्थतेत्याशीहगम्ययेदिति। तथापि कुतोस्य ब्रह्मार्थतेत्या
शंक्य निषादस्थपत्यधिकरणन्यायेनात्सामानाधिकरण्योपपत्तिः॥ नचतेनैव न्यायेन विशेषणसमासोनयु
क्तस्त्याय्यविषयत्वादेकस्य शब्दस्यार्थद्वयसाधारण्ये गुरुलघुचिंतया लघुर्थाचइति। न्यायस्त्विषासति
लोकविरोधप्रयोगवाहुल्यात्तस्यैवादौ बुद्धिस्थत्वात्। कुतो ब्रह्मविषयत्वं तत्रेलिंगं चेत्युत्तरत्वेनयो
जयत्येतदेवेति॥ तस्य लिंगत्वं स्फुटयति नहीति॥ सर्वजगद्धारणस्य परमात्मलिंगस्य दहरे दर्शनाच्च
तस्य परत्वमित्याह धृतेश्चेति॥ अस्य धृत्या तमेकोमहिम्नो दहरे श्रुतस्यास्मिन्नीश्वरेश्रुतसंततेरेषफलवेस्त
स्येश्वरत्वमित्यर्थः॥ सूत्रं व्याचष्टे धृतेरिति॥ अथशब्देन प्रकरणविच्छेदाद्विधृतिशब्दात्कथं दहरस्य
विधारकत्वमित्याह कथमिति। प्रकृतिः॥ मिनाथशब्देनात्मशब्देन च दहरस्यैव बुद्धिस्थत्वान्न प्रकरण
विच्छेदकोथशब्दः किंतु वाक्योपक्रमद्योतीत्याह दहरोस्मिन्नित्यादिना। श्रौतविधृतिशब्दस्यार्थमाह
तस्येति॥ स्त्रियां जानेक्तिन्विधानात्न विधृतिशब्देन दहरस्य विधारकत्वमित्याशंक्याह तिशब्द व्यत्यं न क्ति
प्रत्ययांत। किंतु क्तिच्प्रत्ययांत इत्याह क्तिच इति॥ सेतुशब्देनापि विधारकत्वोक्तौ पौनरुक्त्यमाशंक्य
दृष्टांतेनासंकरहेतुत्वं सेतुशब्दार्थस्यार्थमाहयस्येति॥ इतिशब्दः श्रुत्युदाहरणसमाप्त्यर्थः॥ उक्ते
र्थसूत्रे योजयत्येवमिति॥ तथापि कथं दहरस्येश्वरत्वं तत्राह तार्थं चेति॥ धीवार्धयामादिति

रन्तराधीनेति। तद्दहराकाशमादिश्याह्।। प्रकारान्तरेणाधःतिमाचष्टे तथेति। निश्चितत्वं संदेहस्याप्यविषयत्वं राजकु
मारो व्याधस्येत्यर्थः। ताधिपतिरित्युक्तं।। लोकपालात्मनामपि परस्यैवावस्थानं वक्तुं भूतपाल एष इदं विधरक तथा से
तुरियेति। सर्वव्यवस्थापकत्वमाह सेतुरिति।। तदेव स्फुटयेषामिति। सूत्रार्थमुपसंहरत्येवमिति। दहरस्य पर
त्वे हेत्वंतरं प्रसिद्धेश्चेति।। चकारार्थमाह तत्श्चेति। इतःशब्दार्थं स्फुटयति यदिति।। नास्ति लौकिकी प्रसिद्धिरि
ति। श्रौतिप्रसिद्धिमाह आकाश इति। यदेष आकाश आनंदो न स्यादिति गृहीतुमादिपदं। अलण्याकाशशब्दप्रसि
द्धत्वाज्जीवपक्षोपि निरस्त इत्याह। जीव इति।। ननु लोके वेदे चेत्यर्थः।। तर्हि लोकवेदप्रसिद्धेर्भूताकाशो गृह्य
तां नेत्याह। भूतेति। विनिगमनहेत्वभावं मन्वानस्य प्रत्यवस्थानं प्रत्याह तरेति।। तत्र चोद्यं व्याचष्टे यदिति।। वाक्य
शेषमेवाह अथ येति। दहराकाशस्य सोम्य। अधिकत्वस्तु तदनन्तरमिति तत्र स वर्णनाम स्त्री विद्यानुक्तं तमेव सु
संसर्वकालुष्यविनिर्मुक्तो। वक्ति संप्रसाद इति। अस्मादभिमानद्वयविषयादिति यावत्। शरीरशब्दो देहद्वयार्थः।।
ज्योतस्तत्स्वरूपज्ञानं विषयत्वात्मज्ञानवत्वेन तस्याभेदरूपेण निनिष्पत्तिस्तत्त्वसाक्षात्कारः तत्फलमाह परमिति
उपसंपद्याभिनिष्पद्यत इति व्याचष्टे स्वपितीति व चो तिः शब्दस्य स यदि विषयत्वं निषेधत्वेष इति।। कुतो।
वाक्यशेषस्य जीवध्वजयत्वं तत्राहान्वेति।। संप्रसादेरत्वाच रित्वेत्यादि वरु दाहरणप वंश्रुत्यंतरमवस्थावत्त्व
वद्देहाद्युत्थानमपि जीवलिंगमित्याह तत्र येति। देहाश्रयत्वेश्चेत्तत्कथयं तस्मादुत्कृति इ तत्राह यथेति।। जी
वेन कश्चिदाकाशशब्दोस्तीत्युक्तं विनिगमनमित्यार्शंक्य प्रश्नलभिति दमाभिव्याहारात्स छद्वजीवे
पि वाक्यशेषलिंगात्तत्व सिद्धिः स्यादित्याह यथा चेति।। चोद्यमुपसंहरति तस्मादिति।। दहरश्रोषेजीवपरा

पि न तेन दहरो जीवः स्यादिति नञर्थमाह नैतदिति।। तत्र प्रश्नपूर्वकं हेतुमाह कस्मादिति।। यत्तदाकाशोपमितत्वं
दहरस्य श्रुतं तन्न जीवे संभवतीति विभजते न हीति।। अपहतपाप्मत्वादीनामपि दहरोक्तानां जीवेन संभावनेत्याह
न चेति। उपाधिधर्माः पाप्मादयः अत्र तेन हानुजीवे विसर्वमेतद्युक्तमित्याशंक्याह प्रपंचितं चेति।। तर्हि पुनरुक्तिरस्त
त्राहातेति।। एके ति।। का तर्हि जीवपरामर्शस्यगतिरित्यत्राह पक्षिष्यतीति। जीवपरामर्शे जीवस्य स्वोपाधिप
रपरात्मधीशेष इत्यर्थः।। उक्तासंभवस्यासिद्धिमाशंक्य परिहरत्युत्तराद्वेदिति।। चोद्यस्य वक्तमन्यथात्वमाह प
रामर्शादिति। निराकृतमाशंकोत्थाने निराकरणपर्यवसानमाशंक्याह यथेति।। पुनरुक्तदुक्ताने हेतुमाह उत्तरस्मादि
ति।। प्राजापत्ये वाक्ये जीवेऽप्यपहतपाप्मत्वादिश्रुतेरसंभवो नेति शंकत इत्यर्थः।। कथं तत्र जीवोक्तिरित्यत्राह तत्रे
ति।। प्रतिज्ञावाक्यस्य परात्मविषयत्वमाशंक्याह पर्यायस्य जीवविषयत्वादुपक्रमस्यापि तथेत्याह यद्यपीति
ननु छाया पुरुषे वा स्मिन्पर्याये प्रतिपाद्यते दृश्यमानत्वस्य तस्मिन्मुख्यत्वान्नेत्याह द्रष्टारमिति।। परस्तिपर्यायं
पंचकोशोक्तिवद्भ्रमनिपर्ययार्थमाह बुद्धिवस्त्रत्वलार्थं जीवोक्तिरविरुद्धास्तित्वाशंक्य द्वितीयतृतीयपर्यायोरपि त
द्विषयत्वमाहे तदिति।। उत्तरत्रान्यस्यानुक्तेरन्यार्थो जीवोक्तिरित्यर्थः।। अंतरउपपत्तेरित्यत्र परस्याक्षिस्था
नतायादर्शितत्वाद्यदायपर्यायस्य परविषयत्वादुत्तरयोरपि तद्विषयतेत्याशंक्याह्य इति। स्वप्नेवासना
मये विषये महीयमानतापरस्येव रूपकाभंस्वप्नधीगम्यमित्युक्तेरित्याशंक्याह तदिति।। तदेतदिति
संबंधः।। यत्र यस्यामवस्थायां तदेतत्स्वप्नं यथास्यात्तथा सुप्तः स्वापावस्थाभासो भवति तस्यामवस्था
यामुपसंहृतकरणग्रामस्तत्वापारकृतकालुष्यहीनः स्वप्नमात्रतया विलापयन्मुक्ताह्यावक्तस्तै

आ॰

ज्ञानानंतरभावी ज्ञातोज्ञानक्रियां विना स्वरूपचैतन्यो नाज्ञानस्य साक्षात्पदे हादेः सत्तास्फूर्तिप्रदत्वेन चात्मे
त्यर्थः ॥ तथा चावस्थात्रयेऽप्यात्मा ज्ञो वायमिति श्रुत्यर्थः सिद्ध्यत्याह नैवमिति ॥ स्वप्नावस्थातोऽन्यास्त्वपावस्था वस्थांतरं
तथापि तस्मिन्नपहतपाप्मत्वादिकथमित्याशंक्य विनापि ब्रह्मरूपतामुपास्यात् कीदृत्याह एतस्येति ॥ य आत्मा
पहतपाप्मेत्यादिनोपक्रांतः परमात्मा तथा चतुर्थपर्यायेऽकथ्यत तेते नेतत्प्रतिपादनसिद्धिरित्याशंक्य चतुर्थपर्या
यस्यापि जीवविषयत्वमाह नाहेति ॥ अह इति निपातः खेदार्थे खिद्यमानो हीन्द्र उवाच अयं सुषुप्तः पुमानयमस्य ह
पि त्वेवं नात्मानम स्यायम वस्मीति जानाति नो एवेमानि भूतानि विनाशमेवापीतो भवति नाहमत्र भोग्यं पश्यामीत्ये
वं स्वापेक्षणं हि स्वापुनरूपसत्सादेत्यर्थः ॥ तं प्रजापतिरुवाचैतं त्वेव तेति ॥ अहतमेवात्मानं नेते तुर्यं पुनरपि व्या
ख्यास्यामि नेतस्मादन्यमित्युपक्रमार्थः ॥ तथापि जीवस्यापहतपाप्मत्वाद्युपगमे ध्यात्वादिविरोधेन हेत्वधीनस्य
देहांतरकाले जीवेऽपि पोगादित्याह शरीरेति ॥ मघवन्मर्त्यं वा इदमित्यादिना देहसंबंधं निंदित्वा तत्स्याद्युक्ति
तं जीवं सेवोत्तमपुरुषमेषसंप्रसादोऽस्माच्छरीरादित्यादिना दर्शयतीति योजना ॥ असंभवासिद्धिं निगमयति तस्मा
दिति ॥ हेत्वसिद्धिफलमाह अत इति ॥ सिद्धांतमापादते तं प्रतीति ॥ आविर्भावस्य विशेषविषयत्वात् तद्दर्शयन्तु
शंकोपेत्याशंक्याह लुप्त इति ॥ पश्चाद्यावर्त्तिमेवस्फुटयतिनेति ॥ इहेति दहरवाक्योक्तिः ॥ पर्यायचतु
ष्टयस्य जीवार्थत्वात् कुतस्तद्दहराशंकानेति शंकते कस्मादिति ॥ सोत्रे हेतुमाह पर इति ॥ पर्यायचतुष्टयं
समन्वयार्थः ॥ पुल्लिंगस्फुटितं बहुव्रीहिसमासमाह आविर्भूतमिति ॥ तस्य ब्रह्मत्वात् कथं जीवो विशेष्यते तत्रा
ह भूतेति ॥ अविद्यातत्कार्यप्रतिबिंबितत्वेन ॥ दृष्टांतो जीवभावो भवदिति बिंबब्रह्मलेशानेपि जीवत्वोक्ति

५२

रित्यर्थः ॥ स्वरूपाविर्भावेऽपि जीवस्य जीवत्वानपायात् कुतो ब्रह्मलेश्याशंक्य प्रजापतिवाक्यतात्पर्यमाह ए
तदिति ॥ अवस्थाविशेषविशिष्टस्य परे स्वायोगमाशंक्याह हीति ॥ ऊपजनापायत्वात् प्रतिबिंबवदनात्मा
देहादिरिति ॥ वस्तुमुद्दशरावआलानमवेक्ष्यपदात्मनोविजानीथ स्त्रीमेनूतउत्तरोर्थंय इत्याहोदशरावेति ॥ प्र
रूतो ऽहज्जातीत्यर्थः ॥ सुचना पन्नं बाधः प्रकरणविच्छेदं व्यावर्तयित्वेतमिति ॥ अवस्थायाभोगे निवारित्वेन
कल्पितत्वात् तदवस्थं वस्तु पदेषु मपस्योति किमिति तदुक्तिफलमाह एवं स्वप्न इति ॥ परंज्योतिरित्यादिश्रुतेस्ता
त्तात्पर्यमाह यदिति ॥ परं ज्योतिरेवोपसंपत्तव्यं श्रूयते न ब्रह्मलेत्याशंक्याह यत्तदिति ॥ यत्तु जीवस्यानापहतपा
प्मत्वादीति तत्राह तत्रेति ॥ जीवस्य ब्रह्मात्मैक्यतत्त्वपेण स्वाभाविकाविर्भूतापहतपाप्मत्वादिस्वरूपं तं व
दतिवाक्यमित्यर्थः ॥ कथं मिथो विरुद्धयो जीवब्रह्मणोरैक्यं तत्राह तदेवेति ॥ विरुद्धयुद्धौ कथं शास्त्रमपि तदा
धीत्याशंक्याह नेतरेति ॥ प्रातीति ॥ कविरुद्धाकारस्योपाधिकत्वात् रागमावर्गतस्याजाविकमैक्यमविरुद्ध
मित्यर्थः ॥ अविद्यान्वयव्यतिरेकाभ्यां संसारित्वस्याविद्यत्वं यत्र कुं हृत्वांतत्वेनान्वयमाह यावदिति ॥ व्यति
रेकमाह यदेति ॥ सुखापन्न द्वारा प्रतिबोधनमज्जिनयतिनासीति ॥ सुखापन्नफलमसंसारित्वमुक्तं तत्फल
माकांक्षापूर्वकमाह किमितिः ॥ एवं स्त्री यथा सज्ज्ञानसन्धतत्फलमाह तदेति ॥ विदुषो ब्रह्मलेशाभिमानमाह स
इति ॥ किमित्यब्रह्म तरस्य कल्पितत्वं द्वयोरपि वस्तुत्वं किं नस्यात्तत्राह तदेवेति ॥ शरीरविशिष्टं रूपं कल्पि
तमन्यथा तस्मादुक्तितस्य स्वेनाभिनिष्पत्स्ययोगादित्यर्थः ॥ स्वेनरूपेणाभिनिष्पत्तिरित्यत्र विरोधं चो
दयति ॥ कथमिति ॥ तत्र हेतुं सूचयति ॥ कूटस्थेति ॥ विशेषणव्यावृत्तिमाह सुवर्णादीनामीति ॥ पा ॥ ध्रि

वंरजो ऽव्यांतःकरणस्य धारणे विशेषः स्वर्णत्वभास्वरत्वादि। दाहच्छेदादिसंग्रहार्थमादिपदं। स्वर्णादिवन्न
ष्टाआदीनामभिव्यंजकाइव्यसंपर्काविनाशेपि स्वरूपाभिनिष्पत्तिवत्सद्भावेपिस्यादित्याशंक्याह तथेति।
स्वर्णादीनामिवेति। यावत्। अग्निनावकर्सा विवर्तेजोगीहंदाहोत्तिकेवेयस्य नाहनत्विति। द्रव्यांतरसंसृष्टे
तेनाभिभूतं ततो विविक्तम् अभिव्यक्तिमर्हति। कूटस्थनित्यत्वस्यैतासंयदूष्मसंगाद्वितीयं ततो विवेकद्वाराना
भिव्यक्तिमागित्यर्थः॥ वस्तुतो संसर्गत्वेव्योमोदाहरणं। जीवस्याभिभूतस्वरूपतया ज्ञानात्तदनभिव्यक्तिस्वरूपे
वाभिनिष्पत्तिरित्याशंक्याह इत्येति। जीवस्वरूपस्यानभिव्यक्तो इव्यं स्यसर्वोप्यवहारो विरुध्येत तस्या हृभि
त्ति तद्धीपूर्वकत्वात् तथाचतदनभिव्यक्तिरयुक्तेत्यर्थः॥ उक्तमेवव्यक्तीकुर्वन्नादौतदीयंस्वरूपमनुवदतिइ
ष्टीति। विज्ञानघनएवेत्यादिश्रुतेःश्च न्मात्रस्वभावस्ताव दात्मा तावैतस्य चक्षुरादिद्वाराव्यवंज्यमानं दृष्ट्यादि श
क्तिमतो दृष्ट्यादयोऽस्यस्वरूपमित्यर्थः॥ अथोक्तं रूपमंदेहस्येकैव व्यज्यते स देहस्य तद्व्यक्तिविरोधित्वा
न्नेति। देहसंबंधे जीवस्यास्याधारणं रूपं प्रकटीभवति। तत्राह तत्रेति। तामेव दृष्टिं व्याचष्टे सर्वोहीति॥
सदा दृष्ट्यादिरूपं जीवस्य व्यक्तमित्यत्रार्थापत्तिमाह। अथ येति। अनुपपत्तिमेवस्फुटयति। तन्नेदिति। दृष्ट्या
दिरूपंसर्वनामार्थः॥ निष्पत्तिरभिव्यक्तिर्जीवस्य सदास्वरूपव्य। स्तो कृजितमाह। तद्इति॥ कालपरिपाक
निमित्तं प्रयत्नविशेषनिमित्तं वेतिसंदेहादाह भिन्नेति॥ कालजन्यतत्प्रतिबंधध्वंसो पाधिको वा पुरुषव्यापा
रोपाधिको वेति संशयादुक्तं किमात्मकेति। वस्तुतो संसर्गेपि देहादिभिरविद्यया संसर्गश्रम इति जास्य दृष्ट्या
दिरूपं अलस्त द्विवेकापेक्षया स्वरूपाभिनिष्पत्तिरित्युत्तरमाहान्येति॥ वेदनाः हर्षादयः मिथ्यासंसृष्टत्वे।

दृष्टांतोयथेति॥ विवेकाकादूर्ध्वं स्वरूपेणाभिनिष्पत्तिरपि दृष्टेत्याह प्रमाणेनेति॥ उच्यतइति। तात्पर्यमाह प्राग
पीति। शरीरात्समुत्थायेत्यादिश्रुत्यर्थं दर्शयन् दृष्टांतिकमाह तथेति॥ श्रुतिस्ततमन्वयव्यतिरेकसहितया
योयं विज्ञानमयेयइत्यादिश्रुत्यासिद्धमिति यावद्विवेकज्ञानेनतत्पदार्थशोधनं स्वरूपाभिनिष्पत्तिमेव विवे
कफलभूतां विशिनष्टि केवलेति॥ ननु देहादुत्थानं नाम क्रमणं न पदार्थशोधनं स देहत्वं चवास्तवेनाविधिप्रसि
द्धिविरोधात्तत्राह तथेति॥ उक्तश्रुत्यनुरोधेनेति यावत्। देहासंबंधिनो देहे स्थितिरित्युक्तं विरोधं निरस्यति तु विवेकतो
देहत्वमविवेकतः स देहत्वं मात्रंचर्जैणिकमित्यर्थः॥ स्वकर्मार्जितेदेहे दुःखादिभोगस्यावर्जनीयत्वान्न
जीवतः स्वरूपाविर्भावइत्याशंक्याह शरीरेति॥ अशरीरवदिस्यपेरर्थः। जीवतोपि स्वरूपस्याविर्भावः स्यादिति
शेषः॥ अविरुद्धे श्रुत्यर्थे सोत्र माविर्भावपदं युक्तमित्याह तस्मादिति। मुक्तस्यावेवतौ किंरूप्यौ तांतत्राह न त्विति॥
ज्ञानाज्ञानाभ्यामाविर्भावानाविर्भावौ विलेते द्विवं स्थितौ तत्संशयां शिष्यादिकृतोमेदोपि निरस्त इत्याह एवमिति
न्यायसहितश्रुत्या न जीवब्रह्मणो र्भेदो मिथ्येत्युक्तं। संप्रति प्राजापत्यवाक्यादपितद्भेदो मिथ्येत्याह कुत
श्चेति। एतद्भिन्नस्य जीवस्य प्रतिपाद्यत्वं तत्रास्तित्वमेव मित्युच्यते कुतः शङ्कोक्तं हेत्वंतरं स्फोरयति पतद
ति॥ अतो ब्रह्मलक्षणभूतमन्वप्रतिपाद्यमिति शेषः॥ उक्तं व्यतिरेकेणविवृणोति। योत्तमेति॥ श्रुतिलिंगा
भ्यां केवलजीवलिंगं बाधित्वा जीवो ब्रह्मतयोच्यते नान्यत्वेनेत्यर्थः॥ प्रतीकाभिप्रायेण छायया ब्रह्मणः
सामानाधिकरण्यं न जीवेनेति। नास्ति लिंगमित्याशंक्याह नापीति॥ उपास्ति विधिध्यश्रवणात् स्तुतिपरकत्वसं
भवे प्रतीकोक्तिकल्पनायोगात् आत्मान्वेषणाय प्रवृत्तयोः सुरासुरराजयोरनात्मानं वदन् प्रजापतिर्मृषावादी

विप्रलंभकः स्यादतो ब्रह्मणो जीवेन सामानाधिकरण्यालिंगासिद्धिरित्यर्थः॥ द्वितीयपर्याये जीवस्यावस्थाविशि
ष्टत्वे दृष्टे राधेपिपर्याये न ब्रह्मैकत्वमिष्टमित्याशंक्याह तथेति। आद्यपर्यायेपि जीवब्रह्मसामानाधिकरण्यात् तथैवस
वदित्यर्थः॥ अवस्थानां व्यभिचारित्वाज्जीवस्यासंगत्वाद्युक्ता द्वितीयपर्यायस्यैवस्य परतेति भावः॥ अवस्थाव्यभि
चारेतद्वतोपि तद्भावात्कुतोसंगतेत्याशंक्याह। किं चेति॥ आत्मनो ज्ञानरूपत्वात्तस्य चस्वापे भावात्कथं तद
व्यभिचारितेत्याशंक्याह तथेति॥ पर्यायद्वयं दृष्टान्तयितुं तथेत्युक्ते विकालावपेधे परामर्शासिद्धिरिति भावः॥ का
सुरसावोपिरपितआस्तीत्याशंक्याह यत्विति॥ तत्र यद्ह भाष्यरणपकश्रुतिसंवादयति न हीति॥ आत्मनः स्वभाव
भूतविज्ञते नान्यथा भावो योग्यत्वादित्यर्थः॥ पर्यायत्रयवच्चतुर्थपर्यायालोचनायामपि ब्रह्मत्वम्। नतिस्फुटस्य जी
वस्य प्रतिपादत्वमित्याह तथैव कपसुप्त हि तस्यानुपपदितपरैवस्य मित्याशंक्याह। मद्ववन्निति॥ संप्रसादस्ये
व परेणे व समुपद्यते न जीवस्येत्याशंक्याह संप्रसाद इति। स्वरूपेणाभिनिष्पद्यत इति वचनात्प्रलस्य रूपापन्नत्वेपि
नततोन्यत्वं निरस्यते भिन्नाभिन्नत्वादित्याशंक्यापि विरोधादेकोपाधेतद्योगादन्येनाभावे स्वरूपाभिनिष्प
त्तेरयुक्तत्वात्तच्छतोमेदस्य कल्पितमेवेत्याह नेति॥ एकदेशिव्याख्यामनुवदति केचित्विति। जीवस्यापहत
पाप्मत्वाद्ययोग्यात्तदैक्यकथनस्यान्याय्यत्वं। कथं तर्हि तद्विध्यं प्रकृष्यत गुणानुगुणतया व्याख्यायते॥
एतच्छब्देन पूर्वपर्यायेषु प्रकृतजीवग्रहणात्केनतत्फलेव नान्याचाख्यादावस्थायोनुदृश्यातेत्यत्रा
द्यएतदिति॥ सर्वनामश्रुत्या दूषयति तेषामिति॥ किंचोपक्रमसत्त्वितोर्थस्तुर्य एव पर्याये सर्वना
मार्थः सर्वत्र चातत्राधं प्रस्याह अपश्रुतिश्चेति॥ उपक्रांतो ऽर्थः सर्वत्र सर्वनामार्थोपि न भवति पाधकोहि

५३

निवेशीति द्वितीयपक्षमाशंक्याह एतं त्विति॥ स्वयमप्यमतियोगे फलितमाह तस्मादिति॥ अलेव जिवस्तदिच्छंक
थमित्याशंक्याह। कथंचिति। तस्य विलोपनयोग्यतामाह नेकेति॥ कथं तर्हि तस्य दिहाण्यापारमार्थिकरूपाप
त्तिरित्याशंक्यसदृष्टान्तमाह तदिति॥ रज्ज्वादीनेपारकुरित्यादिविषयापुरोवस्थ धिष्ठानमिति शेषः॥ पोर्वा
पर्यालोचनया प्राजापत्यवाक्ये जीवानुवादेन ब्रह्मत्वं तस्येष्टमित्युक्तं संप्रतिसत्त्वसामर्थ्यालिंगत्वादिप्रामाण्या
त्तुजेवं रूपं वास्तवमिति मतांतरमाह परेत्विति॥ शारीरकमेवतेषामुत्तरमित्याह तेषामिति तत्तलातिबेधा
र्थनैतदारब्धं संम्यक्ज्ञानार्थत्वादित्याशंक्याह स्येति॥ कथमिदमेव तेषामुत्तरमित्युक्ते तदर्थसंग्रहातित
एकत्वेति। तस्य परिणामित्वं वारयति कूटस्थेति। ज्ञानादिगुणवत्त्वं प्रत्याह विज्ञानेति॥ कथं तस्यैकत्वं चेतना
चेतनभेदधीविरोधादित्याशंक्याह विषयेति॥ साचातत्तो न्येति वारं स्पुटरसिलुं मायायेत्युक्तं॥ साधारणासाधा
रणप्रपंचनेदस्याप्रामाणिकत्वाद्विधाभिदिन्नेदेचमानावादिकस्मादेवाज्ञानादिचित्रप्रातिलोविश्च
धीसंभवेत्तद्वेदो रवाज्ञसोस्तीत्यर्थः॥ एकस्यानेकधमत्तानेनाविधयापि दृष्टमित्याशंक्य विवर्त निगुणं द
ष्टान्तमाहमायावीति॥ नान्योतोस्तीत्यादिश्रुतेरेव धारणार्थमाह नेति। शारीरकार्थसंक्षेपसमाप्ता विति थ
व्दः॥ श्रुतिसामर्थ्यादिलिंगिकजीवाभावेपि सूत्रसामर्थ्यादित्यो व जीवोस्तीत्याशंक्याह यत्विति॥ आदिशा
ब्देन नेतरोनुपपत्तेरिति गृह्यते। संसारिणो जीवाद्भेदो त्तमायावदीश्वरस्यासंसारित्वे नो व्यतेतावता भेदव्यप
देशोपि जीवस्यासंसारित्वं न सिध्यतीत्याप्रातिकं नोदंसूत्रकारोपबद्यतीत्याह तत्रेति॥ तत्र तत्र श्रुतिस्मृ
तीतिहासपुराणेषु प्रमितं परमात्मरूपमनूद्य तत्त्वोधीपादितं प्रातीति कं जीवस्वरूपं तत्र कल्पितानि

तिसो दाहरणमाह नित्वेति॥ कथं तर्हि तस्य निरसनमित्याशंक्याह तद्यत्वेति॥ वाक्यानि त्वेतत्त्वमसीत्यादिनि॥
जीवब्रह्मणोरैक्यं तत्त्वाविशेषात् तदाकारेण कारा तरेणत्वा तत्रेदयोर्भेद्यायुक्तानि ब्रह्मनानेत्यादयो द्वैतवादनिषेधाः
परस्य जीवादन्यत्वे तस्यापि तत्तोऽन्यत्वेऽस्यादिवा शंक्याह जीवस्येति॥ अधिसन्नत्वोऽस्यारोप्यत्वादन्यत्वेऽपि न त
स्याधिष्ठाना द्भवति स्वर्य॥ कथं तर्हि तस्य परस्मादन्यत्वं तत्राह किंत्विति॥ अनुवादस्य प्रमितपेक्षात्वं प्रत्या
हाविधेति॥ अपूर्वत्वाभावाच्च तस्या प्रतिपाद्यते त्याह लोकेति॥ जीव भेदस्याप्रामाणिकत्वे कुतो निरधिकारा
णां विधीनां प्रामाण्यमित्याशंक्यानुवादफलमाह एवं हीति॥ ननु जीवब्रह्मणोरैक्यं न क्वापि स्वतन्त्रकारोऽनुरवतो
वदति च दति किंतु सर्वत्र भेद सेवातो नेक्यमिदं तत्राह प्रतिपाद्यं त्विति॥ आदिपदमात्मेति तत्प्रगच्छतीत्या
दिसंग्रहार्थं॥ विद्वान् यजेतेत्यादिश्रुत्या कर्मस्वात्मविदोऽधिकारात्कर्तृत्वादेरस्ति वत्यात् कुतो जीवस्य
ब्रह्मैक्यं तद्विवक्षा कुतो विधिविरोधेनेत्याशंक्य विशिष्टस्यात्मत्वात्तद्विदश्च कर्माधिकारात्मु
ख्यात्म विद्यावतस्तदनधिकारात्तयोरविरोध इत्युक्तं स्मारयति वर्णितश्चेति॥ जीवानुवादेन ब्र
ह्मताविधानविरोधाभावात् प्राजापत्यवाक्ये जीवस्य प्रतिपाद्यत्वान्न तद्ववशं तेन दहरवाक्ये जीवाशंके त्यु
क्तं॥ इदानीं दहरवाक्यशेषस्य गतिमाहार्थान्यार्थश्चेति॥ सूत्रव्याख्येऽयंशंकामाहाथेति॥ वाक्यत्रे दृष्टसंगं दृ
त्तदृष्टोरूनमजीवेति॥ मुक्तहीतो विशेषो दहराकाशस्तस्यापि नाद्यमुपदेशस्तस्मा जीवत्वादित्याहने ति॥
उत्तरत्वेन सत्राभवतार्य व्याकरोत्यन्तरमिति॥ अन्यार्थत्विमेवाकांक्षापूर्वकं स्फोरयति किं तर्हीति॥ संप्रसा
दपदे जीवत्वादिनि श्रुते रीश्वरपरत्वं वाक्यस्येत्याक्षिपति कथमिति॥ व्याख्यया वाक्यस्य परत्वं स्मिन्नेव तात्प

र्यमाह संप्रसाद इति॥ तत्त्वात्स्य विषयत्वं संबंधविषयत्वं वोपायरूपत्वं दहरस्य विषयत्वं वा युक्तं जीवस्य
नापहतपाप्मत्वादीति तत्राहत्य दिति॥ जीवपरामर्शस्य गतिमुक्त्वा दहरश्रुतेः॥ शंकाद्वारा गतिमाहान्ये
ति॥ शंकाभागे विजिज्ञासितव्य इतीति॥ तस्य परममहत्वादित्यर्थः॥ जीवे विकथमल्पश्रुतिर्महत्वाविशेषात्
त्राहजीवस्येति॥ तदुक्तमिति तथाचेष्टेऽक्तोहीति॥ तमेव स्मारयति परमेति॥ कुतो दहरसमाधानमुक्तं तत्राहानं केति
तथापि परममहत्वाना स्ति दहरत्वमित्यत्र किमायातं तत्राह स एवेति॥ तदुक्तमित्यस्य व्याख्यान्तरमाहश्रुत्येति॥
तदेवेश्रुति लिंगाभ्यो दहरवाक्यं ध्येये परस्मिन्न न्वितं प्राजापत्यवाक्यं तु परस्मिन्नन्वितमिति स्थितम्॥ परं ज्योति
रुपसंपद्येत्यादिवाक्या पर्विचार प्रसंगात्तत्र भूमज्योतिर्णां ज्योतिरिति वाक्योक्त परज्योतिष्ट्वसाधकं न तत्रेत्या
दिवाक्यं विमृशति अनुकृते रिति॥ आथर्वणवाक्यमादत्तेन तत्रेति॥ स्वयस्यानावभासकत्वेपि रात्राविवचंद्राद्य
वभासकत्वं नेत्याहनेति॥ विद्युतामपि फल्गुत्वमनुचवसिद्धमितिमत्वोक्तं नेमाइति॥ कैमुतिकन्यायमाह कुत इति
इतश्चसत्याप्यादिनिखिल निर्भासकत्वमित्याहतमेवेति॥ तद्गमनवदनुभानेस्य गतमनुकृतमित्याशंक्याहतस्येति
उक्तेयावे विषयं निकृष्य सप्तम्याः सति विषये च साधारणपाठात्संशयमाहतत्रेति॥ पूर्वत्रात्मश्रुत्याद्यविरोध
दाकाशशब्दस्य रूढित्यागेनेश्वरे वृत्तिरुक्ता तथेहापि सति सप्तम्यां योग्यतानुपलब्धिविरोधाभावात्तीत्यस्य वर्त
मानार्थतात्याग॥ यस्मिन्सति सूर्यो न भाति तत्तेजो धातुरूपास्यत्वेनोच्यत इति पूर्वपक्षमाहतेजइति॥ उक्ता
पूर्वपक्षफलेन निर्विशेषे ब्रह्मलक्षणन्वयोक्तेः श्रुत्यादिसंगतयः पूर्वपदे तेजोधातो ध्यानं सिद्धांते निर्विशेषे
ब्रह्मधीरिति फलभेदः सप्तम्या विषयेपि संभवाद्भवत्तास्यानुकृत्वाचतेजोधातुरिति शंकते कुत इति॥ विष

आनं.

यस्तमस्याभिजघ्राहारादितस्त्रलिंगानुग्रहात्तेजोधातुरेवायमित्याह तेजोधातुनामिति। कुतोऽस्य तेजोधातोर्लिं
गत्वेऽपि आशंक्याह तेजःस्वभावकमिति। प्रसिद्धमनुरूप्यदृष्टान्तमुक्त्वा दार्ष्टान्तिकमाह तथेति। यस्मिन्सति यद्भा
ति। तत्तमनुभातीति विरुद्धमिति कुतः सतीसप्तम्याशंक्याह तानुभानमिति। तमनुभातीति तद्रूपेच्छाया निरूप्य
प्रकाशत्वमिष्टमित्यर्थः। अनुभानस्याविरोधित्वात्प्राग्युक्तलिंगाद्बकस्यचित्तेजोधातोरूपस्यसात्त्रालीढेत्युपसंह
रति तस्मादिति। पूर्वपक्षमनूद्य सिद्धान्तमवतार्य प्रतिज्ञामध्याहरति स्य एव मिति। लिंगसिद्धतेजोधातुसत्त्वात्कुतो
य नियमः स्यादिति शंकते कस्मादिति। हेतुमादाय व्याकरोति तस्य तु कृतेरिति किं तदनुकरणं तदाह यदेतदिति।
तेजसामनुभाने कथं प्राज्ञोऽनुभातीत्याशंक्य तुल्ये तद्रूपत्वादवधारणादित्याह भारूप इति। तेजोतिरेकेणा
नानावाचनतदित्याह मित्यनुभानस्यान्यथासिद्धिं निराह न त्विति। नचेदमेव वाक्यमानमन्यपरस्यमाना त्तर
विरोधेऽदेवताधिकरणन्यायानवतारादिति भावः। विरोधमेवानुभानं परपक्षे नस्यादित्याह समत्वाच्चेति। ननु
सूर्यादयश्चाक्षुषं तेजोऽपेक्षन्ते नासं ते च चक्षुषा न तस्तत्र नात्राह यमिति। चक्षुषोद्भूतप्रकाशत्वात्तज्जन्य
ज्ञानविषयत्वे सूर्यादेर्न सजातीयापेक्षेति भावः। तदेव दृष्टान्तेन स्पष्टयति नहीति। पूर्ववादीनोक्तमनुभा
षयत्वेपरूपीति। गच्छन्तमनुगच्छतीतिसमानस्वभावके ह्यनुकारादनुकानात्तेजसां सूर्यादिभिर्नासत्यपास्मि
न्नानं निषिध्यते सोनिवकः स्थितेऽजोधातुरिस्यनुवादार्थः। अनुकारः स्वभावसाम्यमपेक्षते क्रियासाम्यं वा
नायरसात्याह नायमिति। द्वितीयमंगीकुर्वन्नाह भोमं वेति। अन्यस्य पिंडयोर्द्दृष्ट क्रियाने दाकाविपिंडुद्भेदेन
क्रियानेदेकल्पनित्वा क्रियासाम्यं वा पुरः जसोऽस्त्विति तद्दिग्देशगमनमस्त्येवमुक्तेऽपि सूर्यादेर्लक्षणस्य

तुल्येभानमिति भावः। हेतोरसूत्रानुसारित्वमाशंक्योक्तमनुकृतेरितीति। सूत्रस्य द्वितीयं पदं हेत्वन्तरत्वेना
वतारयति। तस्येति। चतुर्थपादोक्तं हेत्वंतरं स्फोरयति तस्येति। कथमेतावतात्स्यप्राज्ञत्वं तत्राह तमिति
स्वपक्षेमानमुक्त्वापरपक्षे तदभावमाह न तेजो तरेणेति। न केवलं मानाभावस्तद्विरोधश्चेत्याह विरु
द्धं चेति। फलतः सूर्यादिविषयत्वे यत्सर्वशब्दो व्याख्यातः संप्रति तस्यासंकुचद्वृत्तित्वं मत्वा व्याख्यान्तरमा
हापि वेति। कुतोऽत्र तेज्योतिर्गतविकारातिरेकेण तस्सत्तामात्रापत्तेः सर्वज्ञानं तत्राह रूपयोगेति। प्रकरणादपि
ब्रह्मैवात्रग्राह्यमित्याह नेति। सर्वनाम्नां प्रकृतपरामर्शेऽपि कुतोब्रह्मत्वपक्षेतत्त्वाह प्रकृतं चेति। प्रकृतम
पि ब्रह्मैवहि तत्वाचेह संबंधार्हमित्याशंक्याहानंतरं चेति। हिरण्मये परे ज्योतिर्विषयोऽन्तमयाध्यपेक्षयाप
रश्चायं कोशो यस्मात्प्रमयमाचक्षते तत्र ब्रह्म पुच्छं प्रतिष्ठेति। यस्मिन्निरूढं ब्रह्मतत्त्वतिष्ठति तच्च विर
जमागन्तुकमलविकलं निष्कलं निरवयवं शुभ्रं निस्सीमकचेष्टरहितं ज्योतिषां सूर्यादीनां ज्योतिरवभासकं
तच्च विदुषामनुभवसिद्धमित्यर्थः। उदाहरणमपेक्ष्याध्यवहितं ब्रह्मत्वेनकृतं सं प्रत्यपेक्षिता न पेक्षिताभिधानं
त्वाप्यमाकांक्षापूरकत्वेन ह्यर्थत्वादितिविविदितो कं कथमिति। स्वाभ्यब्रह्मवादिरवदर्भं चाकांक्षापूरक
त्वादुत्तरेऽपि मंत्रे ब्रह्मपरइत्यर्थः। सतीसप्तमीमादायोक्तमनुभानमपेतं यद्यपीति। सूर्यादिभिन्नभावकेतेजोऽप्य
तो प्रामाणिके तस्येह यहो न बेति। विलातमात्रेमानाभावाननसोऽस्तीत्याह तत्रेति। ननु ब्रह्मत्वेऽपि प्रामाणि
केऽपि तस्मिन्सति सूर्यादयो न भान्तीति तस्य सत्त्वाभावात् तेषां सदा भानाभावप्रसंगात् तत्राह ब्रह्मणीति
तत्रेति। न सति सप्तमी किंतु विषयसप्तमी। ततो ब्रह्मणि विषये सूर्यादयो न भान्ति ब्रह्मैव तैर्न प्रकाश

आनं. कल्प्येत नातीत्यर्थः॥ यद्वा सती सप्तमी गृहीत्वा तेजोन्तरोक्तौ न जातीति विवक्षितमाना प्रदेशे भावान्तरविरोधश्चक्रा
स्पतीति लक्षणयाश्रुतत्यागेनाश्रुतकल्पना कारेत्याह वास्तवत्यागेनाध्याहारस्य घटान्नभासयतीति॥ विज्जिर्यमि
ध्याहृत्यस्याधिकारस्य ब्रह्मलेव तद्वा सकमिहानी समितिति नावः॥ यस्मा द्युदादिरूपजन्यते॥ नहि पि ब्रह्मणोप
जन्यते चैव ब्रह्म किन्तु चिदन्येन पलज्यते विशेषणादित्याशंक्याह ब्रह्मत्वितीति॥ येनोपलक्ष्यत्वेन सर्वदिपस्तस्मि
न्नब्रह्मणि विषयेनाप्युस्तथाब्रह्मनात्मेनोपजन्यते तस्यापं ज्योतिः स्वरूपत्वादन्यत्रतोपलंभानपेक्षणादित्यन्न
रयोजना॥ तदुपपादयति ब्रह्मणीति॥ स्वप्रकाशप्रकाशत्वादर्शनादशेषप्रकाशकं ब्रह्म नान्यप्रकाशक
मित्यर्थः॥ ब्रह्मणः स्वयंज्योतिष्ट्वेनसर्वभासकत्वेमानमाह तमेवेति॥ तस्याव्याजप्रकासत्वेपि श्रुतिमाह न
तत्रेति॥ निजधर्माहारिणब्रह्मणः सर्वाधिविषयत्वेश्रुत्युक्ते स्मृतीमाहापीति॥ सूत्रं व्याकरोत्यपि चेति॥ तत्राद्या
ध्रुत्वेस्मृतिमाह नतदिति॥ याद्रुकत्वे पितामाहृय्यदादिलेति॥ तदेवं नतन्त्रे स्मादि वाक्यं ज्योतिर्विजित्येपर
स्मिन्नन्वितमिति॥ परस्य ज्योतिष्ट्वोक्तेर्ज्योतिरिदं वेत्युपमीयमानपुरुषस्य ततोऽन्तरत्वमाशंक्याह
शब्दादिति॥ काठकवाक्यं पठत्यंगुष्ठेति॥ स्वाभाविकं परिच्छेदं वारयति पुरुष इति॥ पूर्णत्वात्तत्सर्वोपलब्धे
र्नांगुष्ठमात्रतेत्याशंक्य विशेषणमाह स्थानवारातश्चोगमात्मनध्य इति॥ आत्मनि देहे मध्ये हृदयस्यभ्रमीत्य
र्थः॥ तस्यैव परात्मत्वसाधिकान्तरमाह तथेति॥ अधूमकंज्योतिरकलुषितमेकरूपं प्रकाशमानं य
स्मात्तस्य तथास्यापि कस्तस्य प्रकाशमानुरित्याह ज्योतिरितिज्योतिः परत्वादधूमकमिति लिंगत्वव्यस्य॥
श्रोपितत्वमर्थत्वस्य तदर्थत्वमाह ईशान इति॥ भूतभव्यग्रहणं भवतोपि प्रदर्शनार्थं कालत्रयं परिच्छेद्य नियंतेति

यावत्॥ द्वितीयत्वमाह स एवेति॥ वर्तमाने काले स एवास्ति श्वो भविष्यत्यपि काले स एव भविता अतीतेपि काले
स एवासीदेव न चिके तस्यासाप्रश्नमन्यत्र धर्मादित्यादिना॥ तदेतदेवेत्याहेतदिति॥ विषयमनुष्ठपरिमाणोत्तरीशा
नश्चाक्षुसंशयमाह तच्चेति॥ पूर्वत्रिणकादिना विजयस सम्बाध्वाजधाहारिणः सत्यादिगोचरो बलेनोक्तं तथे
तापि परिमाणलिंगाज्जीवमात्रयेशानो स्मीतिधारयेदिति विध्य धाहारेणोपास्तिपरं वाक्यमिति पूर्वपक्षयति
तत्रेति॥ पठितकवश्रुतेर्निर्विशेषब्रह्मण्यप्यन्वयोक्तेश्चत्यादिसंगतयः॥ पूर्वपक्षेजीवस्योपास्तिः सिद्धांतेतस्यैव
परोत्वतया धीरिति फलभेदः॥ परस्योपासनायै क्वचित्परिमाणोक्तावपि वस्तुपरत्वेने दृष्टेवाकलेतद्योग्य
जीवगृहीतत्रेतिमत्वोक्तं परिमाणमिति॥ श्रुतेरेव लिंगाद्बलीयस्त्वादीशानश्रुत्या परमात्मगतौ कुतो जीवाशंकेत्याशं
क्य परमात्मनि परिमाणोक्तेरयुक्तत्वाद्बाधकादीशानशब्दो विकृतिपरिच्छेदितत्वाशकत्वलक्षसिद्धेर्योगी श्रुतिरित्याशयेनाप्यन्यस्मिं
जीवस्यापि विभुत्वादुक्तपरिमाणासिद्धिरित्याशंक्याह विज्ञानेति॥ कथं चिदिति हृदयकमलकोशस्य जीवो
पलब्धिस्थानस्यांगुष्ठमात्रतयेत्यर्थः॥ किंच यथा सतिविषये वसा धारणीस्त्वमीनेतद्वासयत इति तस्यावि
षये व्यवस्थापितां तथा परिमाणमपि जीवमेश्वरं वेति संशयेस्यांगुष्ठमात्रांक निश्चायकमेतिस्मृत्यापि श्वयति
द्धिरित्याह स्मृतेश्चेति मरणमंतर्यमिथ शक्त्यार्थः॥ तथापि परात्मैव प्रतिपाद्यो स्तुतेस्साहमन्नीहीति॥ प्रकृतिसं
यमने ममापि विक्रुदितिपमस्य तदर्थी नत्वस्मृतेरित्यर्थः॥ स्मृतेः संसारिविषयत्वं निगमयति तेनेति॥ निश्चि
तार्थस्मित्यासं दिग्धार्थश्रुतेरपि जीवतार्थ तैवसाहस्र इति॥ वाचस्य जीवगामित्वे स्थिते तस्येशानोस्मीत्या
ध्यानं फलतीत्युपसंहरतुमिति शब्दः॥ पूर्वपक्षमनूद्य सिद्धांतमवतार्य प्रतिज्ञां व्याकरोत्येवमिति॥ जीवे लि
गसिद्धेर्नियमासिद्धिरित्याह कस्मादिति॥ श्रुतिलिंगयोः श्रुतिर्बलीयसीति मत्वा हेतुमाह शब्दादिति॥

आनं. जीवेपि कल्पितपर्येशितत्वादविरुद्धा श्रुतिरित्युक्तं तन्नश्रुतत्वात्स्यैत्वविशेषश्रुते रित्याह नहीति॥ प्रकरण
मपीश्वरविषयमित्याह तदिति॥ उक्तमर्थं वाक्ययोजनया स्पष्टयति तद्वा। इति॥ जीवस्यैव प्रष्टव्यत्वेन प्रकृत
त्वमाशंक्योक्तं पष्टं चेति। उपहिते तु जीवे कालत्रयापरिच्छिन्नत्वं कार्यकिरणस्यैच्छंत्वद्युयोजिमिति भाव॥ सू
त्रे शब्दादिति वाक्योक्तस्त्त्वस्य लिंगतदुर्बलत्वाद्धुत्वतोलिंगाज्जीवोक्तिः स्यादित्याशंक्याह शब्दादिति॥ श्रुतिलिं
गविरोधे श्रुतिरेवबाधिकान लिंगमिति क्लृतिमयर्थितं च कुसूत्रभाष्ययोरेव कारः॥ सिद्धांतेपरस्य विभुत्वादंगु
ष्ठमात्रत्वमयुक्तमित्युक्तं सत्त्व्यायस्येनाह कथमिति॥ सूत्रमवतारयस्तत्रेति। तद्वक्तव्यं व्याचष्टे सर्वे
ति॥ तुशब्दसूचितं दृष्टांतमाह आकाशस्येति। करस्य कर्मविशिष्ट कोरत्वं किमिति हृदयस्थाना देगुष्ठमात्रत्वंप
रस्य गोणमित्युक्तं तत्राह नहीति॥ तर्हि पक्षिमाणमुख्यत्वात्प जीवएवग्रहतां नेत्याह नचेति॥ मुख्यसं
भवे गोणामुख्ययोर्मुख्येसंप्रत्ययो मुख्यासंभवश्चात्रोक्तस्तेन गोणं परिमाणमित्यर्थः॥ सूत्रावयवभाव
स्पर्शिकामाह नन्विति॥ तदुक्तस्त्वेन तंपातयत्पतद्दति॥ स्वर्गकामादिवाक्ये स्वर्गादिकामित्वाविशेषेणाधि
कारित्वं तस्मनुष्यस्येत्याशंक्याह शास्त्रमिति॥ मनुष्यशब्दस्त्रैवर्णिकविषयः॥ तेषां शास्त्राधिकारे हेतुमा
ह शक्तत्वादिति॥ तेन तिरश्चां देवतानामृषीणां चाधिकारो वारितः॥ तिर्यग्जाते तदर्थज्ञानादि सामर्थ्याभावा
त्क्रमशः कृता देवानां स्वदैवत्ये कर्मण्ययत्नो देशेन द्रव्यत्यागायोगादशक्तिः॥ ऋषीणामार्षेयवरणाभे तदे
भावात्॥ सा करात्मनुमत्त्वेनाचकर्मण्यधिकारं निवर्तयत्यर्थिमत्त्वादित्या। शुक्रार्थनित्ये चाधिकारेपि काम्ये
मुतस्वाबे॥ शूद्राधिकारं वारयत्यपर्युदस्तत्वादिति॥ तेहि शूद्रोयज्ञेनवक्लृप्त इत्युपर्युदासान्न वै
दिके कर्मण्यधिकारिणः॥ तत्रैव हेत्वंतरमाह उपनयनादिति॥ नहिशूद्राणामेकजातित्वात्समस्तेरुप

नयनं तदभावे कुतोध्ययनं तस्य तदंगत्वादध्ययनाभावे कुतस्तदर्थेधिकारः॥ अन्यत्रचापीति तन्मायस्य पदष्टेध्या
येसिद्धत्वान्नेह तदर्थं यस्यतइत्याहेतिवर्णितमिति॥ फलार्थकर्मणिति तिर्यगादेरपि सुखकामस्याधिकारः॥ स
स्वर्गकामश्रुतेरविशेषादित्याशंक्यांगश्रुत्यर्थत्वायसमर्थविषयत्वात्तिर्यगादेस्तदभावेनस्वर्गकामपदं सं
कोच्यमनुष्याधिकारत्वेस्थिते चातुर्वर्ण्यमधिकरोति शास्त्रमिति प्राप्तस्यवसंतो ब्राह्मणोग्नीनादधीत यस्मि
जन्यः शरदि वैश्य इति त्रयाणामेवाग्निसंबंधश्रवणात्तेषामेवाधिकार इति प्रतिष्ठापितमित्यर्थः॥ मनुष्या
णामपि कथमनुष्ठावचानां नियतपरिमाणत्वस्यं तत्राह मनुष्याणां चेति॥ अस्मादादिदेहस्यापि परिमाणम
नियतं दृष्टं तत्राहेति चित्येनेति॥ देहस्यानियतपरिमाणत्वेपि हृदयस्य किमायातं तत्राह नियतेति। परस्मिन्नपरि
माणोक्तेर्योगमुपसंहरत्यतइति॥ अंगुष्ठमात्रमनुरूपस्य जीवत्वे विवाक्यस्य परार्थतेति च कुतुक्तमनुवदतिपद्यपि
ति॥ अनुष्ठानजीवस्यांगुष्ठमात्रत्वे प्रतिपाद्यमाने परात्मधर्मविरोधस्तत्राध्वं प्रतिपाद्यस्य तात्पर्यविषयत्वादित्या
हतदिति॥ परात्मपरेवाक्ये तस्यैव वक्तव्यत्वे कुतोजीवोक्तिरित्याशंक्य प्रवृत्ते हेतुरूपमाह द्विरूपेति॥ कथं प्रवृत्ते
वाक्ये प्रवृत्तिस्तत्राह तत्त्वेति॥ नहि परस्य जीवस्योक्तिं विनाशक्यं वक्तुमिति तदुक्तिरित्यर्थः॥ नन्वद्धादि किंसि
धे किमुक्तं तत्राह तमिति॥ किस्कांग॥ शत्यागेना विरुद्धांशलक्षणयैकं वाक्यार्थेन विरोधः परिहृत इत्यर्थः॥ यतोंत
र्यात्मा पुरुषत्वात्तस्योपाधिजनानां हृदये सदासंनिविष्टस्ततोंगुष्ठमात्र इति तस्य मर्थानुवादस्तस्यान्वयव्यतिरेका
भ्यां तदनुसारिश्रुत्या च शोधनमाह तमिति॥ शरीरं स्थूलं सूक्ष्मं च प्रवहेत्पृथक्कुर्याद्धैर्येण शमादिनेति या
वत् तं च विविक्तमात्मानं विशुद्धममृतं ब्रह्मैव जानीयादित्याह तमिति॥ तदेवं काठकवाक्यं प्रत्यग्ब्रह्मणि ज्ञात

आनं. वेसम ।। न्वितमिति ।। मनुष्याधिकारत्वादित्युक्तेर्मनुष्याणां देवादीनामनधिकारमाशंक्योक्तं । तदुपपद्यत इति ।।
निर्गुणविद्याहेतुवेदान्तविचारादिषु देवादीनामधिकारोऽस्ति न वेति सामर्थ्यविसंवादसंभवात्संदेहे शास्त्रसं
गत्येपि लक्षणसंगतेयं चिंता शंकाद्वारा सेति कीसंगतिमाहांगुष्ठेत्ति ।। अत्र चाधिकारनिरूपणद्वारा मंत्रार्थ
वादादीनां प्राप्तिविरोधयोरसत्तोर्देवताविग्रहादावन्वयोक्तेरध्यायसंगतिः मंत्रादिप्रामाण्यन्यायसाम्यादुपस
नादिगिरामधिकार्यादिसमर्पकाणां श्रुतेर्थ्यर्थप्रामाण्यात्तत्त्वमाप्त्विचसोऽपि ब्रह्मैवेपर्यवसानमिति श्रुतिशा
स्त्राध्यायपादसंगतयः ।। पूर्वपक्षे मंत्राद्यप्रामाण्याद्युपगमनादि गिरामपि स्वार्थे तद्योगात्तत्वमादरेऽपि नैकानिष्ट
लेति फलमिति सिद्धांते तत्प्रामाण्यस्य तदर्थे संभवात्तत्वमस्यादेरपि संभवत्येकत्वनिष्ठेति फलं ।। यद्वा देवादी
नामनधिकारस्यायेनक्रममुक्तिफलोपास्तिषु भोगद्वारा मोक्षकाममनुष्यप्रवृत्तिरप्यनियतेति पूर्वपक्षेफलं सि
द्धांते स्वाद्यधिकारविचारस्यदेवादिष्वव संगत्वा नावेपियथोक्तोपास्तिषु मनुष्यप्रवृत्त्यर्थं साक्षान्मोक्षफल
निर्गुणविद्यायां तेषामपि प्रवृत्तिरिति प्रयोजनं ।। तत्राद्ये सिद्धांतमेव दर्शयन्मनुष्याधिकारत्वं शास्त्रस्यायोग
व्यवच्छेदादन्ययोगव्यवच्छेदाद्वेति विकल्प्याद्यमंगीकरोतीति बाढमिति ।। द्वितीयं दुपपत्तीनत्विति ।। नियमाभावं
सत्राद्वारमारभ्य याचिशदव्यतितेषामिति ।। ब्रह्मविद्यातरंगविधयो देवादीनाधिकुर्वन्ति वैदिकविधित्वाद
ग्निहोत्रादिविधिवदिति शंकते तस्मादिति ।। अनुमानमयेपुष्पमाद्ये हेतुमुपाध्यभावाच्च हेसंभवादिति ।। नन्वेव
तादीनां विविधभोगभाजामवैराग्यात्तन्न मोक्षेऽर्थित्वं तत्राह तच्चेति ।। वैषयिकसुखस्यानित्यत्वपारतंत्र्यादिदो
षदृष्ट्या वैराग्यसिद्धेः परमपुरुषार्थत्वान्मोक्षेऽर्थित्वं महाधियांतेषां मुदेष्यतीत्यर्थः ।। चतुर्थ्यंतशब्दाति

रिक्तदेवताभावात्तस्याश्चविग्रहस्याभावान्नज्ञानहेत्वनुष्ठानशक्तिरित्याशंक्याह तयेति ।। तयोरसतोर
पि शब्दवदनधिकारे शंकितेऽवोक्तं न चेति ।। त्रैवर्णिकानामेवोपनयनाद्देवादीनां तदभावेवैदिकशब्दाभावान्ना
धिकार इत्याशंक्याह न चेति ।। नहि तेषां वादेर्जिनोध्ययनस्याभावे कुतोवेदार्थेऽधिकारस्तत्राह तेषां चेति ।।
जन्ममरणव्यवधानेऽपि कृतप्रजादिषु स्मृतिदर्शनाच्च तदस्मृतिरिति भावः ।। तथापि पूर्वोक्तानुमानमेनाप्र
तिकुतो देवादयो ब्रह्मविद्यायामधिक्रियेरन्नित्याशंक्य कालातीतत्वमाहापि चेति ।। ब्रह्मचर्यादीत्यादिपदेनोप
गमनशुश्रूषादिग्रहः ।। इतीत्यादिपदेन सनत्कुमारनारदसंग्रहार्थं ।। नकेवलं लिंगविरोधदेवकालाती
तत्वं किंतु तद्बोधाद्देवानामित्यादिवाक्यविरोधमप्यतिमत्वाह यत्वीति ।। देवानां कर्मसु नाधिकारो देवतांतराण
मुद्देश्यानामभावात्तदनुष्ठानाशक्तेरिति सूत्रार्थः ।। ऋषीणामपि भृग्वादीनामार्षेये कर्मणि नाधिकारोऽन्या
र्षेयांतराभावात्तदुक्तेः कर्मण्यशक्तेरिति सूत्रान्तरार्थः ।। अधिकारहेतुसत्वं ज्ञानेऽपि तुल्यं तेषामिति ।। कुतोवाक्या
र्थधीरित्येतदुपपत्तिनतदिति ।। तदेवस्पष्टयति नहीति ।। साधकबाधकसत्वासत्वफलमाह तस्मादिति ।। दे
वादीनामधिकारेऽकृपर्वांगुष्ठमात्रश्रुतिः नहि तेषां महादेहानां हृदयमंगुष्ठमात्रं तत्राह देवादीति ।। साधार
णीत्वंगुष्ठमात्रश्रुतिस्तत्र तत्र तत्तदंगुष्ठपरिमितहृदयापेक्षया निर्वक्ष्यतीत्यर्थः ।। मंत्रादीप्रामाण्येन वि
ग्रहादिमत्वं गृहीत्वा देवतादीनामधिकारो निरूपितः ।। संप्रति देवतादिविग्रहादिवादिमंत्रादीनामन्यपराणा
मविरोधे प्रामाण्यात्तत्पदादिविरोधमाशंक्य परिहरत्सूत्रं चतुरस्ये क्षितेऽग्रथमं कर्मणि विरोधमाशंक्य प
रिहरति विरोध इति मानान्तरविरुद्धेऽर्थे मंत्रादीनामन्यपराणामप्रामाण्याद्विग्रहवद्देवतादिविषयाणां तेषा

मुपचरितार्थतया शब्दोपहितोऽर्थस्तदुपहितो वा शब्दो देवादिरित्यचेतनत्वात्तस्यानधिकारसिद्धिरित्यभिसं
धाय शंकां विभजते स्यादिति । अभ्युपगम्य तावदिन्द्रादीनामर्थप्रकृतिवशे ऽर्थेरस्य रूपं परसंनिधानेनांगत्वं त
त्राह तदपि चेति । कथं विरोधस्तत्रस्तत्राह नहीति । दर्शनाभावमुक्त्वा मुक्तमभावमाह न चेति । इन्द्रादीनां स्वरू
पसन्निधिद्वारा यागांगत्वायोगे हेतुमाह वषट्कुर्यादिति । उद्दिश्यत्यागत्वाद्यागस्य न विरोधोऽस्तीत्याह नान्यमिति । विरो
धमंगीकृत्यापि परिहर्तुं विग्रहवत्त्वं न हेतुमात्रायत्तं स्यादिति कस्मादिति । एकस्य युगपदनेकत्वापत्तिर्विकल्पेनाह
कथमिति । प्रामाणिकत्वेन विरोधं समाधत्ते दर्शनादिति । तत्र श्रौतं दर्शनमाह तथाहीति । वैश्वदेवस्य निविदि
दिक्कति देवाः शस्यमाना इति व शाकल्येन पृष्टे याज्ञवल्क्यस्योत्तरं त्रयश्चेति । शस्यमानदेवतासंख्यावाचि मंत्रप
दे निविच्छ्यते । षडधिकत्रिंशताधिकत्रिसहस्रं देवा इति संख्यानिर्णयानन्तरं संख्येयप्रश्ने वसवोऽष्टावेकादश
रुद्रा द्वादशादित्याः प्रजापतिरिन्द्रश्चेति त्रयस्त्रिंशद्देवाः पूर्वेषां मन्त्राणां बोद्धव्यानि इत्याह कतम इति । अनन्ताभा
वश्रुतेस्तत्तात्पर्यमाह । एकैकस्येति । ते षिद्वाः षण्णामग्निपृथिवीवायुतेजस्त्वादित्यद्युदिवाम्महिमान
स्तेऽपि त्रयाणां लोकानां तेच द्वयोरन्नप्राणयोः स्तोऽथैकस्य प्राणस्य निप्राणस्य सर्वे महिमान इत्येकस्यानेक
रूपताधीरित्याह तथेति । त्रयस्त्रिंशतोऽपि देवानामिति संबन्धः । श्रौतं दर्शनमुक्त्वा स्मार्तं दर्शनमाह तथेति ।
वलं योगमाहात्म्यं तेषामर्थक्रियामाह तेऽश्चेति तेषां योगा यत न लभ्यामाह प्राप्नुयादिति । परलोकहितत्वमा
हके श्रिषदिति । तस्मात्स्वयं पुंसो निरस्यति रक्षितपश्चेति । योगिनामनेकरूपमपि पतावपि देवानां किंजा
तन्त्वाह प्राप्तेति । अणिमा लघिमा चैव महिमा प्राप्तिरीशिता । प्राकाम्यं च वशित्वं च यत्र कामावशायि

तेऽपष्टैश्वर्याणि । अविरलब्दरूचितमर्थमाह किंचिदिति । आजानसिद्धानां जन्मनैव प्राप्तातिशयानामित्यर्थः ।
तथापि प्रकृते किं जातं तत्राह हानेकेति । श्रुतिस्मृतिभ्यां युक्तिविरोधे समाहितेऽपि प्रतीति विरोधस्य कः समाधि
स्तत्राह परेश्चेति । आदिशब्देन परदर्शितिबंधो गृह्यते । उक्तन्यायाद्युज्यते देवादीनां विग्रहवत्त्वोपगमेन
विद्यास्वधिकार इति शेषः । संनिहितस्यैवांगतेति नियमो संनिहितस्यापि युगपदनेकत्र कर्माण्यंगभावप्र
तिपत्तिरंगभावगमने तस्य दर्शनादिस्यर्थान्तरमाहानेकेति । तदेवस्य पक्षपितुं व्यतिरेकं सोदाहरणमाह कचि
दिति । संप्रत्यन्वीद्यांगत्वार्थमन्वयं सदृष्टान्तमाचष्टे कचिच्चेति । अन्वयव्यतिरेकसिद्धमर्थं प्रकृते योजय
ति तद्वदिति । असंनिधानेऽपि देवतायाः विप्रकृष्टस्यानेकार्थं ... युगपदनेकत्रांगतासिद्धेरित्यर्थः । कर्मण्य
विरोधमुपसंहरतीति विग्रहेति । तत्राविरोधेऽपि देवतादीनां विग्रहवत्त्वे शब्दे प्रामाण्यविरोधमाशंक्य प्रत्या
ह शब्द इति । चेदिति शंकां विभजते मानामिति शब्दस्याकृत्यर्थत्वात्तत्र विरोधो नेति शंकते कथमिति ।
गोत्वादिवदश्वादिषु पूर्वापरापरामर्शाद्युपाधेयरपि याचकत्वादिवदिन्द्रादेराकाशादिशब्दवद्व्यक्तिवचना
वस्थादिशब्दा इति मत्वाह नित्यकं हीति । अस्मान्निरूपितं येवं तद्दृश्यमिति । न तस्य विरोधोऽस्तीत्याशंक्याह
इदानीं त्विति । व्यक्तिनाम नित्यत्वात्तत्संबंधस्यापि संकेतवदनित्यतया पुंधीकृतत्वान्मानान्तरापेक्षत्वं पुंधी
प्रभवशब्दवदर्थसंबंधाधीनता वस्तार्थधियोऽपि मानान्तरापेक्षत्वादिदृश्यमानं स्यादित्यर्थः । परिहार
स्थेनमर्थमाह नाम्यमिति । कर्मणि विरोधं दृष्टान्तयितुमपि शब्दः । तत्र प्रथमपर्वकं हेतुमुक्त्वा व्याचष्टे क
स्मादिति । तथा च देवादिजगद्धेतुत्वेन शब्दस्य नित्यत्वात्तदनित्यत्वकृतो दोषो नास्तीति शेषः । पूर्वापरवि

रोधं शंकते नन्विति॥ शब्दस्य निमित्तत्वाद्रूपलक्षणयोः पादानत्वादुभयप्रवृत्तंजगतो युक्तमित्याशंक्याह प्रवि
ति॥ आकृतेः शब्दार्थतया विरोधसमाधिरित्याशंक्याह यावतेति॥ मानाभावान्न वस्तुत्वाद्विजातीरस्तीति तद्व
कौ नीज निमित्ताद नित्यत्वेतिना विरोध इत्यर्थः॥ व्यक्तीनामनित्यत्वेपि वाचकशब्दनित्यतयासुकरो विरोध
समाधिरित्याशंक्याह॥ तदिति॥ जगतः शब्दप्रभवत्वमुपेत्य विरोधमुक्त्वा शब्दस्यार्थोत्पत्त्युत्तरकालत्वाद्धर्मस्य
तद्वीजत्वायोगात्तद्वचनात्सीत्याह प्रसिद्धेहीति॥ विरोधं निगमयति तस्मादिति॥ वस्वादिशब्दार्थसंबंधनी
त्यत्वं दृष्टान्तेन वस्तुत्तरमाह नेति॥ तत्रापि व्यक्तेरनित्यत्वाच्छब्दसंबंधनित्यतेत्याशंक्याह नहीति॥ व्यक्तिनि
रूपेदानातिरपिन्नातेत्याशंक्याकांक्ष्येति॥ अन्ये द वंद्व दस्यापि भावान्नित्यमनेकसमवेतं सामान्यमिति
चस्थितेरितिशब्दार्थः॥ आकृतिनामुत्पत्त्यावेपि कुलसंबंधनित्यतातन्नात्राह न्तेति निष्कर्षेति॥
वास्त्वात्कृतिदारालक्षणयाशाक्षोनवंलीति नावः॥ दृष्टान्तमुपसंहरति व्यक्तिधिति॥ गवादिशब्दा
र्थसंबंधनित्यत्वेपि प्रकृते विमित्याशंक्य दार्ष्टान्तिकमाह तथेति॥ उक्तो देवादिधात्वर्थः कावः॥ साध
कामावादित्याशंक्याह कृतीति॥ अनेकत्र साकल्येन वर्तमाना जातिरित्यंगीकारादिंद्रादीनां मंत्रादी
सिद्धविग्रहादिपंचकवतां पूर्वापरव्यक्तयनुगतजातीरनुगतधीविधानविरुद्धतेत्यत्र स्वादिशब्दानां
तिवाचीनाबाद्रूपयुज्यमानाः खः एत शब्दत्वाद्घटादिशब्दवदिति चानुमान्यदित्यर्थः॥ इंद्रादिशब्दा
नामुपाधिनिमित्तत्वं पक्षांतरमाह स्थानेति॥ औपाधिकत्वपक्षे शब्दार्थमनुधावान्तरलयेपि वि
रोधाभावमाह ततश्चेति॥ यत्तु पूर्वापरविरोध इति तत्राह न चेति॥ न हि कथमतः प्रभवादित्यु

क्तं तत्राह कथमिति॥ उक्तेर्थमानं पष्टुतर पद्मवतारयति कथमित्यादिना॥ नन्विंद्रियकं प्रत्यक्षं
जगतः॥ शब्दप्रभवत्वे नास्तित्याह प्रत्यक्षमिति॥ श्रुतौ प्रत्यक्षशब्दे हेतुमाह प्रामाण्यमिति॥ तथापि
तत्रानुमानं कथं प्रमाणं तत्राहानुमानमिति॥ तत्रापि प्रवृत्तिनिमित्तमाह प्रामाण्यमिति॥ अव्यभिचारिलिंगे
त्थानादनुमानस्य स्वतः प्रामाण्ये तुल्यत्वे सापेक्षत्वमात्रसाम्यादनुमानं॥ शब्दः स्मृतावितिभावः॥ जंसृष्टा
भीष्टमर्थमाह एतेहीति॥ नत्र श्रुतिमाह इति॥ एते असृग्रमिंदवस्तिरः पवित्रमासवः॥ विश्वान्यभिसौ
भगत्येतन्मंत्रस्थपदैः स्मृत्वा देवादीन्त्रलासस्सर्ज तत्र संनिहितवाचकेतच्छब्दोद्देवानां करणे धनुश्चाह कल्पे
नस्तानिहितानां स्मारकोसृग्रप्रुधिरं तत्प्रधानदेहरमरणान्मनुष्याणामसृग्र इत्ययं शब्दः स्मारकः॥ इंदुर्मंडल
मध्यस्थपितृणामिंदुशब्दः स्मारकः॥ पवित्रं सोमं स्वांतस्तिरः कुर्वतां ग्रहाणां तिरःपवित्रशब्दः स्मारकः॥ स्त
चोस्तुवतां स्तोत्राणां गीति॥ रूपाणामाशवशब्दः स्मारकः॥ प्रस्तोत्रानंतरं प्रयोगे विशतां शस्त्राणां विश्वशब्दः
स्मारकः॥ व्याप्तिवस्तु वाच्याप्तिशब्दसंयुक्तः॥ सौभगेति सौभाग्यवाचकः॥ शब्दस्तेनाभिसौभगेति निरतिश
यसौभाग्यार्थः॥ शब्दोन्यासां स्मारकः॥ तथा च तत्तत्पदेन तत्तद्देवादीन्स्मृत्वा प्रजापतिः सृष्टवा
न् इति॥ शब्दपूर्विकां सृष्टिं श्रोतीमुक्त्वा तत्रैव श्रुत्यंतरमाह तथेति॥ स प्रजापतिर्मनसा सह वाचं मिथु
नत्वावमन्वभावयत् त्रयीप्रकाशितां सृष्टिं मनसालोचितवानित्यर्थः॥ स भूरिति व्याहरन्स भूमि
मसृजतेत्यादिवाक्यमादिशब्दार्थः॥ तत्र तत्रेत्यानाय प्रदेशोक्तिः॥ रूपसृष्टिमाश्रित्यपमाह वियुक्तं॥
संप्रदायवातिरेकेणापि सिद्धिर्व्यक्तमस्त्येवं शब्दसृष्टिस्ताथापि कथं तत्स्वरूपसि सृष्टिस्तत्राह यत इति॥

उक्तस्य इत्थो त्त्वापौरुषेयत्वमशंक्योक्तमुक्तार्थोपीति ॥ संप्रदाय योग्यर्थशिष्यपरंपरा । राध्ययनमुक्तिर इति
रेव किं न स्यात्तत्राहानादीति ॥ कर्मणि प्रवर्तनं सत्तामनुष्ठापनम् तेन ॥ सर्वेषामित्यत्र कर्मणांस इति वेति
तिभेदः । सेस्वाशब्दो रूपमेव स्यादि । अस्मदादिवृद्धव्यवहारतः शब्दपूर्वकत्वात्पश्चात्कालोपि स्यात्तस्य
तत्पूर्वकत्वमनुमेयमिति । प्रत्यक्षानुमानाभ्यामित्यत्रार्थान्तरमाह्यापि चेति ॥ कल्पकालिनास्तसृष्टिः शब्दपूर्विका
सृष्टित्वादिदानींतनसृष्टिवत् । विमतः शब्दार्थसंबंधः व्यवहारस्तत्पाविधसंबंधानुसृतिपूर्वकोभि
धानाभिधेयसंबंधव्यवहारत्वात्संप्रतिपन्नवदित्याहुरित्येति । प्रत्यक्षादिसिद्धेर्थे तेति रीयुक्तिमाह
तथा चेति ॥ स्वनुवदति ज्याहरन्न संततिस्त्वमस्मज्जलेत्यादिरादिशब्दार्थः ॥ उक्तश्रुतेस्तात्पर्यमाह
भूरारादीति ॥ यदुक्तं जगतः शब्दप्रभवत्वं तदाच्छिपति किमात्मकमिति ॥ वर्णातिरिक्तशब्दमुपे
त्यततो वा जगदुत्पत्तिरित्याद्येन्यो यामाहुः वर्णातिरिक्ते वाचके शब्दे मानाभावात् ॥ नेतरः वर्णाना
मुत्पन्नप्रध्वंसिनां जगद्धेतुत्वासिद्धिरित्यर्थः ॥ तत्रैव व्याकरणे वक्ष्यमाणं मानं मत्वा आद्यंपक्षमाल
बते स्फोटमिति ॥ स्फुट्यते व्यज्यते वर्णैरिति स्फोटोर्थव्यंजकः तमर्थं स्त्वे हेतुमभिप्रेत्यदमुक्तं तस्य
नित्यत्वात् कारणत्वसंभवादित्यर्थः ॥ वर्णानामेव प्रत्यभिज्ञया नित्यानां जगद्धेतुत्वसिद्धेनस्फो
टकल्पनेत्याशंक्य प्रत्यभिज्ञाया जातिगामित्वान्नैवमित्याह । वर्णेति । हेत्वसिद्धिमाशंक्याह उत्पन्नो
न्नेति ॥ तदपि न संमतमित्याशंक्य पुरुषविशेषानुमापकत्वेन तत्संमतिं साधयति तथाहीति ॥
वर्णेष्वन्यथात्वधियो ध्वन्युपाधिकत्वेन मिथ्यात्वान्न तदपि नित्यत्वसाधकतेत्याशंक्याह न चेति ॥

वर्णानामुत्पत्तिमत्त्वात् तस्य भवत्वं जगतो नेत्युक्ता तेषामवाचकत्वादपि तन्नेति न कुतः मर्थधीसाय
कत्वं । व्यस्ताव्यस्तेन चेति । किमेकैकस्माद्वर्णाद्दर्थधीः उत समुदायादिति विकल्प्याद्यं दूषयति नहीति
एकैकाकारवर्णधियो हस्तं वर्णान्तरोक्तिवैयर्थ्यात्ततः स्यात् द्वितीयं प्रत्याह न चेति ॥ तेषामुच्चारणस्य
क्रमवत्त्वायोग्यानुपलब्धेस्ताबाधिगमात्तदीत्यर्थः ॥ वर्णानां रूपतोसाहित्ये पि संस्कारद्वारा साहित्य
मस्त्वेवाहित्यादपूर्वेति ॥ अज्ञातो ज्ञातो वासोर्थधीहेतुरिति विकल्प्याद्यं निराह तन्नेति । उच्चरितस्य वधि
रेणाग्रहीतस्य ग्रहीतस्याप्यगृहीतसंगतेरजत्वायत्वादित्यर्थः ॥ ज्ञातस्य ज्ञापकत्वे दृष्टान्तो धूमवदिति ॥
द्वितीये प्रत्यक्षेणानुमानेन वा तद्धीरिति विकल्प्याद्यं निरस्यति नचेति ॥ द्वितीयं शंकते कार्येति । अर्थधीसम
र्पणाकार्येनाधः ॥ संस्कारादयतेर्थधीस्ततस्तत्संस्मयोयाप्रत्ययादित्याह नेति ॥ यदि द्वितीयः ॥ तत्रा
ह संस्कारेति ॥ स्मरणस्यापीति संबंधः ॥ क्रमज्ञाविस्मरणानुमितसंस्काराणामपि क्रमभावेनासाहि
त्यान्न तत्साहित्यात्पूर्ववर्णधीरित्यर्थः ॥ वर्णानां वाचकत्वायोगे फलितमाह तस्मादिति ॥ ननु वर्णानामर्थप्रत्य
त्यायकत्वासिद्धावर्थधीः स्यात् हेतुत्वेन चास्फोटरोगस्येतमानान्तराद्धानाधः तदवगतेरर्थधीस्तथा
चस्ते लत्यन्योन्याश्रयणान्न चस्तामात्रेण स्फोटोर्थधीहेतुः सत्ततप्रापालात्तन्न द्वितीयस्तदनुपलब्धेस्त
त्राह सचेति ॥ स चैकप्रत्ययविषयत्वाद्यथा प्रसवनास्तद इति संबंधः ॥ वर्णान्वयव्यतिरेकनियमा
दर्थधियो वर्णा एव शब्दस्येत्याशंक्य तेषां स्फोटव्यंजकत्वेनान्यथासिद्धेर्मैवमित्याह । एकैकेति । ए
कैकवर्णप्रत्ययैराहितसंस्कारबीजे यस्मिन्नन्त्यवर्णप्रत्यये चितिस्तस्मिन्निति यावत् । न चान्त्यवर्णाभि

आनं० र्थवत्त्वं तद्दीजन्मातिशयवत्वा-च्चित्तस्येत्याहांत्येति ॥ ध्यानाभ्यासदर्शनसंस्कारपरिपाकसचिवेचेतस्मिरल
त्तत्वं चकास्ति तथाच्यायं केचित्ते विनाविचारेसत्त्रसैव कोयं शब्दइति धीविषयतया स्फोटो भातीत्याहैकेति ॥
अन्योन्याश्रयप्रसंगमपाकर्तुं क्रुदितीत्युक्तं मकथियोवर्णविषयसत्तिल्लाच्च स्फोटसाधकतेत्याशंक्याहनचे
ति ॥ अनेकधैकत्वबुद्धिर्न्नमत्वात्पदादिधीरिग्व्यचर। स्फार एवेत्यर्थः ॥ स्फोटदृष्ट्यापत्तुत्पन्नप्रध्वंसित्वाभ्युप
जगद्भूतुलेत्याशंक्याह। तस्यचेत्ति प्रत्यक्षेण तानुमानेन कत्तया प्रत्युच्चारणं भिन्नत्वात्कुतोस्य नित्यत्वं तत्राह
भेदेति ॥ स्फोटवादमुपसंहरति तस्मादिति ॥ आचार्यसंप्रदायोक्तिपूर्वकं सिद्धांतमाहवर्णाइति ॥ गो
रित्युक्ते गकारौकारविसर्जनीया इति ॥ किमस्यत्यर्थं त्वस्यपरत्वं तस्य वाक्यत्रेपाद्ग्रहणादुपवर्षाचार्योव
र्णानामेव तु शब्दत्वं पश्यतीत्यर्थः ॥ तेषां क्षणिकत्वात्ततस्य त्वं जगतोनेत्युक्तं स्मारयति नन्विति ॥
प्रत्यभिज्ञयास्थायित्वसिद्धेर्न्न क्षणिकतेत्याहनेति ॥ प्रत्यलानंतरीयकतयावर्णानां भेदसिद्धेरन्य
थासिद्धा प्रत्यभिज्ञेत्याहसाहश्यादिति ॥ किं क्वचिद्व्यभिचारदृष्टेर्बाधदृष्टेर्वानाद्यः सर्वत्रसंशय
प्रसंगात ॥ न्वाजादौतुल्यभावेतत्त्वाद्विकार्यनुपपत्तेनद्याद्यवदिहतदभावादित्याह नेति ॥ न द्वितीयइ
त्याह प्रत्यभिज्ञानस्येति ॥ गवादौ जातिप्रत्यभिज्ञाहेतुरिहापि स्येतिशंकते प्रत्यभिज्ञानमिति ॥ यत्रजा
तिप्रत्यभिज्ञा तत्र व्यक्तिभेदः कृत प्रत्यभिज्ञातत्त्वा नान्यजाति विषयतेत्याहनव्यक्तीति ॥ तदेव स्फुटयति
यदिहीति ॥ युक्ति तो वर्णं कि विषयाप्रत्यभिज्ञेत्युक्ता प्रतीतितोपि तयेत्याह वर्णेति ॥ हि शब्दः स च्चितमनु
नवम नियतिच्छिरिति ॥ ह्रस्वत्वदीर्घत्वादिकं तु धर्मवत्त्वात् धर्मिभेदः स्यादिति शंकते नन्विति ॥ भेद

प्रत्ययेपि प्रत्यभिज्ञाया निरपेक्षत्वस्वरूपविषयत्वेन प्रबलत्वात्तस्य च सापेक्षत्वविषयत्वेन दौर्बल्यादेक।
स्यामाकाशस्य तौ कुंभाकाशः कूपाकाश इति वत् व्यंजकवायुसंयोगविभागवैचित्र्याद्वर्णेष्वेवैचित्र्यधीर्न
स्वरूपइत्याहचेति ॥ कल्पनागौरवाच्च वर्णेष्वस्वतो वैचित्र्यं नास्तीत्याहापि चेति ॥ भेदधी हेतोस्त्वयापि
कल्प्यत्वात्तुल्याकल्पनेत्याशंक्य स जातिकल्पनावाद्याधिकेत्याह तास्विति ॥ कथं तर्हि भेदधा भेदधियाविरो
धात्संक्षाह। तद्वर्णेति नायमौपाधिको भ्रमः। बाधकाभावादित्याशंक्याहेपइति ॥ एकत्वनानात्वयोरेकत्र
वास्तवोपपत्तौ किंमिति वाध्यबाधकत्वं तत्राह कथं हीति ॥ एकस्य युगपदनेकरूपत्वानुपपत्तिरित्यर्थः
तमेकत्वप्रत्यभिज्ञानं भेदधियो बाधकमेवेत्यर्थः ॥ कंठादिदेशे सहकोऽनिष्टस्य वाय्वोः संयोगविभाग
योर्व्यंजकत्वमुपेत्य वर्णेषु भेदधीर्नस्वरूपस्वेति परमतमुक्ता स्वमतमाहाथवेति ॥ अत्रप्रश्नपूर्वकं व
र्णेभ्यो ध्वनिं निष्कर्षति कः पुनरित्यादिना ॥ अवतरतीति सध्वनिरिति शेषः ॥ वर्णातिरिक्तः शब्दो ध्वनिरि
त्यर्थः ॥ सएव प्रत्यासन्नः स्वयुंसो वर्णेषु स्वधर्मानारोपयतीत्याह। प्रत्यासीदलश्चेति ॥ वर्णेषु
दत्ता दिवत्तपदुत्वादिरपि स्यान्यायविरुद्धं स्यादित्याशंक्याह तदिति ॥ वर्णानामेवाध्यायकानां ध्वनि
त्वे कुतो भेदधीस्तेषु तत्कृतेत्याशंक्याह वर्णानामिति ॥ ध्वनेश्च सानुनासिकत्वादिभेदस्वतस्तरजावाते
न्यार्थंतरत्वात् तस्तालेषु भेदधीर्युक्तेत्यर्थः ॥ एतेन तस्य जातित्वमपि प्रत्युक्तं ॥ वायुसंयोगविभागयो
र्व्यंजकत्वं हित्वा किमिति ध्वनिनांतरुपगतं तत्राहैवं चेति ॥ पक्षान्तरेपि तुल्यमेवांसावं बनत्वमि
त्याशंक्याह स्वरूपेति ॥ अस्तु कल्पना का हानि स्तत्राह संयोगेति ॥ संज्ञप्रत्यक्षत्वमश्रावणत्वं च

आनं॰ र्त्वापत्तितोषोः हेतुत्वे किं सुना साविति शब्दः ॥ अपारितोषहेतुस्त्वेकपदमपत्तायोगेऽफलमालत इति। वर्ण
मात्रस्याप्रत्यभिज्ञानानुगतत्वादिमसाये चतक्षानानादशैकपककल्पनानुपपत्तेः इति योऽपि पक्षो नेसा
र्थं यसाह पिचेति। विरुद्धधर्मत्वाद भिन्नत्वात्मा दिव्यक्तेः स्यादित्याशंक्याह नहीति । तस्यैव दारुटणेन।
स्फोटस्य तिनहीति। खण्डमुण्डापुपरक्ततया प्रत्यभिज्ञायमानगोत्ववदुक्तत्वादिमत्त्वेन भात्वानाम
पि वर्णानां नतात्त्विकं नानात्वमिति। भाव ॥ प्रत्यभिज्ञयापत्त्यिलं वर्णानामुक्तानि तेषामेव वाचकत्वं वर्ण्यस्फोटे
विघटयन्निवर्णेभ्यश्चेति ॥ कल्पनामप्यन्नाह नेतिकथंतर्हि तद्धीस्तत्राह प्रत्यक्षमिति। तथा स्फोटाकारादिं स्फोट
यत्येकैकेति। वर्णेषु व्यंजकेषु दृष्टेषु तत्संपत्तया स्फोटाविने व सं प्रयोगं च कास्ती त्याह रुदितीति। एवं खंरव्याका
रायस्यां बुद्धौ स्फुरतिसतत्पालं बनं नचात्र कश्चिदाकारो वर्णातिरिक्तो भातीतिना स्याव वर्णगमित्वान्नातिरिक्तो स्फो
टमानं तस्याह नास्पाइति। वर्णगमित्वमस्यास्तत्ज्ञानो तस्त्वादसिद्धमित्याह। एकैकेति। सर्ववर्णविषयत्वेत दितरस्फो
टविषयत्वेच तुल्येन पक्षपातहेतुरिति शंकते कथमिति। पक्षपातत्वे हेतुमाहेत्यत इति। गोरिति बुद्धौ गकारादिवर्णा
नामेवानुवृत्तावपि कुतोऽस्यात्तत्पदं बनत्वं स्फोटव्यंजकत्वेनापि तदनुवृत्तियोगादित्याशंक्याह्यदिति। नरयत्वस्या
बुद्धौ निषयकृतस्फोटव्यंजकतया वर्णानिवृत्तिर्वन्हि बुद्धाविव धूमस्य लक्षणस्य भानासिद्धेरिति भाव ॥ नन्वस्या
बुद्धेः स्फोटविषयत्वे न वर्णविषयत्वमपि तेषां भागेव मत्वेकं दृष्टं तया प्रकृतबुद्ध्यनपेक्षत्वात्तत्राह तस्मादिति ॥ अ
नेकैकत्वबुद्धेर्भ्रमत्वमुक्तं स्मारयति नन्विति। अनेकस्य निरुपाधिकैकबुद्धिविषयत्वे सोपाधिकत्वद्विषय
त्वं स्यादित्याह तद्धीति। तत्रैकदेशसंबंधादिनिबंधना धीरिहेतु किं तत्त्वे त्याशंक्याह त्विति। न चैकार्थधीहेतुत्वे

सत्येकपदत्वं। तस्मिंश्च तद्धीहेतुत्वमित्यन्योन्याश्रयत्वमर्थज्ञानात्पूर्वं केषांचिद्वर्णानामेकस्मृत्यारूढानामेकार्थ
धीहेतुत्वादेकपदत्वनिश्चयात्र चानेकसंस्काराणामेकस्मृतिहेतुत्वं कुशकाशादिवदनेकसंस्कारजन्यैकस्मृति
दर्शनात्तत्क्रमवद्वर्णसंस्काराणां स्थापित्वादन्त्यवर्णदृष्ट्यनंतरं साहित्यात्तेषां सर्व। वर्णविषयैकस्मृतिहेतुत्वसिद्धेरि
ति भावः॥ वर्णानामेकस्मृत्यारोहिणामेकपदत्वे पदविशेषसिद्धौ क्रमापेक्षा न स्यादित्याहत्रेति। तदनपेक्षाभावे
हेतुस्तएवेति। दृष्टांतेन प्रसाहयत्रेति। क्रमानुरोधिनां वर्णानां पदधीविषयत्वे फलितमाह तत्रेति। कथमेतेषां वर्णानामे
तावतामेतत्क्रमकारणं। एतत्पदत्वमित्यादिविशेषधीस्तत्राह व्यक्तेति। व्युत्पत्तिदशायां वृद्धव्यवहारः क्रमादित्या
दिशब्देन संख्या गृह्यते। स च व्यवहारो मध्यमवृद्धस्य प्रवृत्त्यवस्थातादृशत्वं व्युत्पत्तिदशादृष्टक्रमाद्यनुगृहीतत्वं तम।
र्थं गृहीतसंबंधप्रतियोगित्वमित्यावत्। यावंतो यादृशा येन च यस्यार्थस्येति पाठ्यस्का वर्णाः प्रज्ञातसामर्थ्यास्तेतथैवाव
बोधका इति न्यायेनाह इति। वर्णेति। स्फोटवादिनस्तु यद्दृष्टं वर्णानामर्थबोधकत्वं तस्य तन्निरस्य स्फोटस्य
कल्पनासा च गौरवदुष्टेत्याह स्फोटेति। किं च येन हेतुना वर्णानामर्थव्यंजकत्वं निरस्तं तेनैव तेषां न स्फोटव्यंजकत्व
मपि यदि कथंचिदस्मा स्फोटं भासयेयुस्तर्हि तस्यैवार्थमिति युक्तं लाघवादित्याह वर्णाश्चेति। स्फोटपक्षं प्रतिक्षि
प्त वर्णपक्षः समर्थयितुं संप्रति वर्णानां नित्यत्वे पि गत्वादिजात्यन्तरेणैव संगतिधीरनादिव्यवहारश्चेति शो
हिमारूढः सन्नाह यापीति। अर्थप्रतिपादनप्रक्रिया वर्णेष्वभ्यर्थप्रतीतेः संभवादित्याद्याः वर्णानां नित्यत्ववाच
कत्वयोः सिद्धौ फलितमाह ततश्चेति। जगतः शब्दजत्वमुक्तमुपपन्नमिति शब्दनित्यत्वमाह तत एवेति ॥ पूर्वमीमांसा
यामेव वेदनित्यत्वस्य सिद्धत्वादिह तन्निरूपणसाधनमकिंचित्करमित्याशंक्य सूत्रतात्पर्यमाह कर्तुरिति। पूर्व
तंत्रसिद्धमेव वेदनित्यत्वं देवादिजगदुत्पत्तौ वाचकशब्दस्यापेक्षावादसूक्तमिति। शंकितेऽशब्दादेव नित्यात्व

तिमतस्तत्क्रमे तिसमाहितमेव येदोवान्तरप्रलयस्थायीजगद्धेतुत्वादीश्वरवदित्यनुमानेन दृष्टौकर्तुमिदं सत्रमित्यर्थः
तात्पर्यमुक्का इतराश्रिप्याकरोत्यत इति॥अनुमानस्येदं वेद्भुतिमनुकल्पयतितयाचेति॥यत्नेनप्रत्युपनकर्मणा वाचो
वेदस्य पदवीयमार्थयोग्यतां ग्रहणयोग्यतामाप आप्तवंतस्तस्तांवाकम्यविभुप्रविष्टांविधमानाम्न्वविंदन्ननु
लब्धवंतोयाशिकाइतियावत्॥तस्यतात्पर्यमाहद्वितायमिति॥अनुवित्तामनुलब्धामित्येललत्रैवस्मृतिमाहवेदे
ति॥वेदान्कर्मज्ञानार्थान्मंत्रब्राह्मणवाचान्सतिहासानितिहासशब्दितनानार्थवादोपेतान्प्रसिद्धेतिहाससहिता
न्वालेषामप्यवान्तरप्रलयेसत्वात्सर्वमवान्तरसर्गादावित्यर्थःगतपस्यापिनतद्धाओधाध्यापकाभावाद्वादित्याशंक्या
हानुज्ञाताइति॥महाप्रलयेज्ञातेरपिसत्वासिद्धेः।शब्दार्थसंबंधनित्यत्वमाशंक्यसूत्रत्याहसमानेति॥सूत्रव्यावर्त्यमा शं
क्यमाह।यापीति॥अवान्तरप्रलयेशब्दार्थसंबंधनित्यत्वाभावेपीतियावत्॥तत्रविरोधसमाधिमुत्कमंगीकरोतियदिति
अन्निधानशब्देनाध्यापकाध्येतारावुक्तौ॥अनिधनानिधेयप्रवाहरा विच्छेदसंबंधनित्यत्वमध्यापकाध्येतपरंपरा वि
च्छेदेचवेदनित्यतेस्यविरोधः इत्यर्थः॥महाप्रलयेतुनाविरोध इत्याह पद्यात्विति॥जगतोनिरन्वयनाशेअत्यंतापूर्वस्य
चोत्पत्तौसंबंधनित्यत्वाद्यसिद्धिःसंबंधिनोरभावेतदभावादध्यापकाधनाभेवाप्याघनावाद्रूलणश्वकेवलस्यात
दाश्रयत्वात्तोमहाप्रलयेविरोधताद्वस्यमित्यर्थः॥परिहर्तुंस्वत्रंपातयतितत्रेतिनादिदेवाकुर्वन्नादित्वंसं
सारस्यप्रत्तिजानीतातद्यापीति॥महाप्रलयमप्यंगीकरोपीतियावत्तत्रवक्ष्यमाणन्यायेहेतुकरोतीप्रतिपाद
यिष्यतीति॥तस्यानादित्वेपिमहाप्रलयव्यवधानादस्मरणेवेदानांकुतस्तदीयोव्यवहारस्तत्राहानादेचेति॥नकश्चि
द्विरोधःशब्दार्थसंबंधनित्यत्वादेरितिशेषः॥स्वापेप्रलयेचप्राणःमात्रावशेषानवशेषास्तांविशेषेपिकर्मविक्षेप
संस्कारसहिताविद्यावशेषतासाम्यादनयोःसाम्यंकथंपुनःस्वापेप्रलयस्यप्रबोधेचप्रभवस्यश्रवणंतदाहस्वापेति॥

यदेतुपक्रमादयशब्दस्तदेत्यर्थः॥प्राणःपरमात्मासुप्तस्यपरस्मिन्नेकीभावावस्थातदेत्युक्ताःएनंप्रकृतेवागयंपरमा
त्मानमन्तर्वहिरिंद्रियाणिसविषयाणिस्वापेपरमात्मनिविलीनमीत्यर्थः॥प्रबोधेतस्मादेवजगतोजन्मोदाहरतिसइति॥स्सु
प्तःपुरुषःयथेयस्यत्मात्यागुपक्रमवशगत्तदेषितिद्वस्यमेतःस्मादात्मनइत्यत्रैवापादानंप्राणःपरमात्मेवसर्वेप्राणा।
वागादयस्तेभ्योनंतरंलब्धनुयाहकादेवाअग्न्यादयस्तदनन्तरंलोकाःशब्दादिविषयाःकल्पितस्याज्ञातस्त्वान्वावात्द्दष्ट
दृष्टिसृष्टिस्यानुव्यत्पत्तिलयावुक्तौव्यावर्त्य।ह्रस्विकसत्वेत्वनाद्यनुतिरिति॥अनुसंधानयोगायोगान्वांद्दष्टांतदार्ष्टान्तिकवैषम्यं
शंकतेस्यादिति॥सर्वजायोग्यपर्यंधेनाख्यापातात्तदाप्रबुद्धेस्य।सुप्तानांपुनर्व्यवहारग्रहात्कालविप्रकर्षस्यमरणस्य
चवासनोच्छित्तिनोऽभावात्तत्रस्मरणं॥इहतुविमतोनजन्मांतरव्यवहारानुसंधानाहेंजनिमत्तिव्यवहितत्वादस्म
दादिवदित्यनुमानान्नस्मरणमतोदृष्टांतेशब्दार्थसंबंधनित्यत्वाविरुद्धंदार्ष्टान्तिकेननैवमित्यर्थः॥हिरण्यग
र्भादिनामनुसंधानसिद्धेर्नवैषम्यमित्याहनेषइति॥तेषामस्मदादिसाम्यमाशंक्योक्तंयद्यपीति॥इतिशब्दोयद्यपीत्यनेन
संबध्यते तथापिनप्राकृतवदितिवक्तव्यमुक्तमर्थेदृष्टान्तेनसाधयतियथेति॥आमानुष्यादावस्थायोज्ञानादिप्रतिबंधस्यो
त्तरोत्तरमुत्कर्षेप्रतीतिप्रमाणायतिदृश्यतइति॥आमनुष्याच्चहिरण्यगर्भादुत्तरोत्तरज्ञानाद्याधिक्यमानमाहइत्ये
तदिति॥हिरण्यगर्भःसमवर्त्ततेत्याद्याःश्रुतिवादाज्ञानमप्रतिघंयस्येत्याद्याःस्मृतिवादास्तेषामुक्तेर्थेतात्पर्यलिंगम
भ्यासमाहासकृदिति॥पूर्वकल्पीयेश्वराणांकल्पांतरमुक्तत्वात्कथंव्यवहितानुसंधानंतत्राहतत्रश्चेति॥पुरुषविशेषा
णांव्यवहितानुसंधानयोग्यस्थितत्वादितियावत्॥पुरुषविशेषानेवाहातीतेति॥ईश्वराणांतद्भावनामात्रजायज
मानानामित्यर्थः॥प्रादुर्भवतांहिरण्यगर्भादित्वावेनेतिशेषः॥तेषांसर्वफिनव्यवहारानुसंधानेरुतुमाहपरमेश्वरेति॥
हिरण्यगर्भस्यपरस्यानुग्रहेमानमाहतथाचेति॥विपर्वोदधातिकरोतीत्यर्थः॥पूर्वकल्पनादोषहिणोतिदद्यातिं॥तद

संस्कारयत्रापि विविच्याणामाकारबुद्धो प्रकाशात इति तथोक्तस्तत्वमस्यादिवाक्योत्थधीवृत्तिव्याप्य मित्येत छरणंनुत्ताःजलम्ब
नमित्यर्थः। नकेवलमेक स्येव प्रतिमानं येना विश्वासः किंतुत अध्यारवाड्यशे पिब हवः सन्तीत्याह स्मरन्तीति। कं ग्वेदो द्रा
म एउलात्मकोमंडजानां दशतयमंडं ध्यास्ती तिदशतय्यस्तत्रमवान्च रुरवेदा तिरिक्ते घ पिवेदेषु काएडस्य कर्मत्रादिरशे
वो ध्यस्यनादि। मिः स्मतास्त्याहश्रतीति। एवमेवमंधुर्छंद प्रन्न लिखदिवेत्यर्थः। किंचरूप्यादिधीयर्वमनुष्या नं दर्शयंतीश्रुतिस्ता
स्तान्रषीन्मंत्रान्दष्टोदर्शयंतीत्याहश्रु तिरिति। तत्र तत्र अपमम्प्यादिज्ञानं विनानुष्ठानेदोष माहयोऽदेति। आर्षेयं रूषिसंबंधं
छंदो गायत्र्यादि दैवतमग्न्यादिब्राह्मणं विनियोगेन वर्तितान्य ता नियस्यामेत्रस्य तेन याजयति याजं कारयत्यध्यापयत्यध्याप
नं कारयति। स्थाणुं स्था वर्गार्त्तेनरकमप्याधज्ञानेतापिलेतथ्यधार्थः। भगवत्प्रेतादीनां जन्मांतरानुस्मरणादर्शनमोन्यायानु
गृहीतानमप्यादि कुस्मत्यादिप्रमित कल्यान्तरीय वेदानुस्मरणसत्वक श्रो तत्ल्लिंगानां कल्पांतर व्यवहारानुस्मरण
संसाधकत्वं। नच कालविप्रकर्षस्यनलनाशयो ध्यसर्वसंस्कारोच्छेद कत्वं पर्वत्नियस्तस्य त्वनुसंधानाज्ञातमात्रस्यहर्षादि
दर्शनादित्यर्थः। कल्पांतरानुसंधानेन व्यवहार प्रवर्त्तनयोगात् सर्वकल्प तुल्ये वोत्तर रकल्पप्रवृत्तिरित्युक्तं संप्रतिसर्ष्टि
निमित्ताद्दष्टमहिम्नो ग्राापि पूर्वसदृशैव उत्तर सृष्टिरित्याह प्राणिनां चेति। कथं तावतास्य दिसादृश्यमुत्तर सृष्टेरित्या
शंक्याह दृष्टेति। अन्वयव्यतिरेकसिद्ध लद्दष्टत्व मागममा व प्रतिपन्न त्व मात्र अविकत्वं विशिष्ट संस्थान पश्वादिकामन
याहृतं कर्मतादृशं पश्वादीनावयतीति दृष्टविषयरागाधीन कर्म फलभूतस्यष्टे निःशेषं पूर्वदृष्टसृष्टि सादृश्य मित्यर्थः
पूर्वोत्तरस्य दिसादृश्य मानमाहस्मृतिश्चेति। तेषां सृज्यमानानां प्राणिनामिति निर्धारणे षष्ठी। तेषां पौनःपुन्ये
नसृज्यमान तयानादिस्य प्रवाहस्य नाशनादित्वं धौत्यत्पूर्वकृत कर्म पारवश्यमुत्तर सृष्टौ किंमिति प्राणिनामित्या
शंक्याह हिंस्रेति। व्यवस्थया धर्म्माधर्म्मसंस्कृतत्वं कथं ते या मिदं तत्राह तस्मादिति। संप्रतितन धर्म्मादिरूपचिद
घ्याचा चिन्नवेपितरा क्ष्ना वितत्वधीरित्यर्थः। यत्तु निर्लेपं प्रजीयते जमदितितत्राह प्रलीयमानमिति। ततश्चोपाधन

६५

शक्ति नियमादपि पूर्वसदृशैवोत्तरसृष्टिरित्यर्थः। कार्यस्य कारणमात्रात्मना श्रावात्मोत्तरसृष्टेः सादृश्य मित्याशंक्याह शक्ती
ति। निरन्वयनाशो ननवस्तोद्देश्ये दोष माहितरथेति। शक्तिवैचित्र्यादि चित्रसृष्टिमाशंक्याह नचेति। अविद्याशक्तेरेक
स्यास्तत्कार्यशक्तिनेदकत्वं नेगौरवात्। आत्माविधेवनाः शक्तिरिति स्थितेरित्यर्थः। पूर्वोत्तरसृष्टिसादृश्ये फलितमाह। त
लक्ष्येति। चिद्धि धर्मजात्यत्वं व्यवस्थानेत्यर्थः। कारादिलोकस्यास्तत्कार्यशक्तिनेदकत्वनेगौरवात्। प्रवाहोऽनोगक्रमश्च
देवादिप्राणिसमुहोनोक्रूवर्या। वर्णाश्रमादिमवस्थात्सदीयधर्मा धर्मइतिनेदः। दृष्टांतस्पष्टयतिनहीति। मनःषष्ठानी
न्द्रिया। नापीयतिस्मतेः। षष्ठमिन्द्रियं मनस्तस्य नासा धारणोविषयः सुखादिरपि साक्षिमात्रगम्यत्वात्तत्तुल्यमस्पंतासदिति
यावत्। यद्वा षष्ठमिन्द्रियंत्वानेंद्रियेषु कर्मेन्द्रियेषु वानास्ति तद्विषयस्तु दूरापास्तः तथाव्यवहारस्यथात्वं प्रतिकल्पमशक्यं
कल्पयितुं नहि। कस्यांचित् सृष्टौ नेत्र श्रोत्रादिर्गोचर विपर्यायो दृष्टस्तथा सर्वकल्पेषु लोकतो कितकर्म नियमस्ति। इति
त्यर्थः। उक्तमर्थं स्मृतिप्रमाणमयन्नकृतसञ्ज्ञाद्वाराणि योजयत्यत श्चेति। समाननामरूपाणां विशेषाणां प्रत्तिसर्गेसर्गे
पि कुतो विरोधस्तमाधिस्तत्राह समानेति। प्रादुर्भवतां विशेषाणां समाननामरूपत्वे मानमाहसमानेति। उक्तं व्याकर्तुं
श्रुतिं व्याचष्टे यथेति। तत्रैव श्रुत्यंतरमाह तथेति। नाचिकेतस्य यजमानोऽग्निरुच्यते। अग्नेरग्न्यंतरात्वाप्रजमा
नश्चेयं कामयित्वा किंकृतीत्यपेक्षितितत्राह स इति। कृत्तिकास्वपः कृत्तिकानक्षत्रदेवता येषु बहुवचनं नक्षत्र बहुत्वात्
अष्टाकपालमष्टासु कपालेषु पचनीयं निरवपं निरूप्तवान् उक्तपुरोडाश हविष्का मिष्टिं कृतवानित्यर्थः। उक्तं कृ
श्रुतेस्तात्पर्यमाहन्त्सत्रेति। मित्रोवा अकामयत चंद्रमावा अकामयतेत्येवं विधश्रुतिरिर्वेज्ञातीयकाद्योत्तरसृष्टौ स
मान नाम रूपत्वमिह तु र्तत्स्मृतिरपि हढ्यश्चेतिसंबंधः। वेदेष्विति विषयसप्तमी। शर्वर्यंतिप्रलयंते रुतुलिंगानि वसं
तादिनाम्नलनां चिह्नादिनिनवृत्ति प्रलयपश्चात् नादीनि पर्यायपि पौनः पुन्येन परिवर्तनि येषु युगाभिमानि नितीता

देवास्तेषां चैतैर्दैवैरिह चक्षुराद्यभिमानिभिस्तु व्याहतियोजना।। देवादीनां विग्रहवत्त्वे सर्वप्रत्ययोपगमेन च कर्माणि शब्दे
च विरोधमाशंक्य समाधिरुक्तः संप्रति तदुपर्यपीत्यत्रोक्तमधिकारमाक्षिपति मध्वादिष्विति।। पूर्वपक्षे सूत्रतात्पर्यमा
हेहेति।। प्रतिज्ञाभागस्यार्थमाह देवादीनामिति।। तेषां समर्थिताधिकारस्यापोद्यो न युक्त इत्याह कस्मादिति।। तत्र हे
तुमवतार्य व्याकरोति मध्वादिष्विति।। मधुविद्यायां देवानामधिकारायोगं दर्शयति कथमिति।। तेषां मनुष्यासकल्पार्थमुपा
स्यत्वेन तस्य सत्त्वमाहासाविति।। किमर्थं मनुष्यग्रहणं तत्राह देवादिष्विति।। उपास्योपासकभावस्य भेदापेक्षत्वात्।।
प्राच्यामादित्यनाम्नि मध्वन्यत्वेत्तीणाधिकारत्वेनादित्यत्वाभावादित्येवं मधुवृक्षशिरादिवत्यस्यायुक्तेत्यर्थः।। तर्हि दिव
तांतराणामुक्तोपास्त्यधिकारित्वं नेत्याह पुनश्चेति लोहितं शुक्लं कृष्णं परः कृष्णं मध्ये क्षोभत इवेत्युक्तानि पंचरोहि
ता तादीन्यमृतानि प्राग्वा गच्छांतरदेशस्थितनाडीभिस्त्वरात्मदेवादिकर्मकुसुमेभ्यस्तत्त्वेददिक्रमं च मधुकरै
रादित्यमंडलमानीतानि सोमाज्यपयः प्रभृतिद्रव्याकृतिनिष्पन्नानि यशस्तेजोवीर्यमित्येवमात्मकान्यादि
त्यमधुसंबंधीनि वस्वाद्युपजीव्यानि चिंत्यतामृतं वस्वाद्यात्रिरुच्यंते।। तेषामुपासकत्वे कर्मकर्तृविरोधस्स्या
दित्यर्थः।। आदिशब्दार्थमाह प्रत्येतव्येति।। कर्मकर्तृविरोधसाम्यादित्यर्थः।। तथापि कथमृषीणामनधिकारस्त
त्राहतथेति।। सप्तसु शीर्षण्यप्राणेषु द्वयोर्द्वयोर्गोतमादिदृष्ट्यापास्तिं दक्षिणकर्णयोर्गोतमो वा०मो भरद्वा
जश्चक्षुर्दक्षिणं विश्वामित्रो वामं जमदग्निरित्यादिना चलत्वे तेषामेवाधिकारः विरोधादित्यर्थः।। क्वचिदनधि
काराच्च सर्वत्रानधिकारः।। ब्राह्मणस्य राजसूयानधिकारेपि बृहस्पतिसवेऽधिकारादिति शंकते कुतश्चेति।।
देवादीनां विग्रहाद्यभावादनधिकारं साधयति ज्योतिरिति।। सूत्रं विभजते यदिति।। आदित्यः
सविता प्रथा चंद्रश्चंद्रमा नक्षत्रमित्यादिशब्दानां ज्योतिर्मंडलविषयत्वे प्रसिद्धिं दर्शयति लोकेति।

यावदादित्यः पुरस्तादुदेतीत्यादिरस्तमेता।। आदित्यो देवमधित्यादिवाक्यशेषः।। उदयास्तमयौ च ज्योतिर्मंडल
स्यैवोपलभ्येते तेन तदेवादित्यपदमस्तु तर्हि तस्यैवाधिकारस्तत्राहनचेति।। आदित्यानामचेतनत्वादनधिकारेपि
चेतनत्वादग्न्यादीनामधिकारः स्यादित्याशंक्याहेतेनेति।। नरवच्चादित्यादिस्थोग्न्यादयो विशिष्यंते येन तेषां चेत
नत्वादधिकारितेत्यर्थः।। देवादीनां विग्रहाद्यपरिग्रहादनधिकारितेत्युक्तममव्यमाणः सिद्धांती शंकते स्यादि
ति वज्रहस्तः पुरंदर इत्याद्यो मंत्राः प्रजापतिरात्मनो वपामुदखिददित्याद्योर्थवादाः इन्द्रोमान् हविर्देवादास्य
तेयत्तमावितां।। तेन तत्तास्सत्यं यत्सेन सर्वकामफलैः पुत्रैरित्यादीनीतिहासपुराणानि।। लोकेपि यमं दंडहस्तमा
चक्षते वरुणं पाशहस्तमतो मंत्रादिप्रामाण्याद्देवादीनां विग्रहादियोगाद्विधार्थिधिकारितेत्यर्थः।। विग्रहवत्वा
दीत्यादिशब्देन हविर्भोजनं तत्तृप्तिरैश्वर्यं फलदानं च गृहीतं।। देवादीनां विग्रहादिपंचकं प्रामाणिकमित्युक्तं दूष
यति। यदुक्तं लोकतो विग्रहादिधीरिति तत्राह न तावदिति।। तर्हि प्रत्यक्षादिप्रसिद्धितो लोकप्रसिद्धेर्नेष्टस्तत्रा
ह प्रत्यक्षादित्य इति।। अस्तु तर्हि तन्मूला लोकप्रसिद्धिर्नेत्याह न चेति।। देवता विग्रहादिपंचकस्य समर्थ्यः।।
तर्हि लोकप्रसिद्धेरितिहासपुराणं मूलं तत्राह इतिहासेति।। तस्य यन्मूलं तद्देवलोकप्रसिद्धेर्मूलमितिभ्र
स्तु तर्हि निर्मूलतल्लसिद्धिस्तत्प्रसिद्धेर्मूलयोरुपेयगिरां मूलाभावे प्रामाण्यासिद्धेरिति नाव।। अपौरुषेया
णामर्थवादानां तर्हि लोकप्रसिद्धिमूलत्वे नार्थवादाधिकरणविरोधस्स्यादित्याह अर्थवादा इति।। मंत्राणां तर्हि स्तु
त्यर्थताभावात्तन्मूलतेत्याशंक्याह मंत्रा इति।। व्रीह्यादिवत्कर्मणि श्रुतिलिंगादिविनियुक्तानां तेषां दृष्टद्वारेणो
पकारित्वात्स्यदृष्टकल्पनायोगादर्थप्रत्ययस्य प्राधान्याभावं सर्गिकत्वात् प्रयोगसमवेतार्थस्मृत्या देवतास्व
र्पं नाशात देवताया विग्रहादावपि तात्पर्यं नेदेवादयस्त्वेषामधिकदित्याह मंत्राधिकरणमुक्तेर्थे प्रमाणयति इ।

४७ आनं.

त्वाचन्तत इति॥ विग्रहादिर्पंचकेमानाभावे फलितमाह तस्मादिति॥ सत्वार्थ्यां प्रवर्पिक्लेसिद्धौ सत्यति आर्वइति॥
तत्र परमर्षो निषेधं स्वपक्षप्रतिष्ठां चिकीर्षन्नैते तु शाब्दइति॥ यदुक्तं ब्रह्मविद्यायां देवादीनामधिकारोऽस्ति विद्यात्वान्म
ध्वादिविद्यावदिति तत्र मध्वादिविद्यानां देवादिष्वामिश्रत्वाच्च तास्वनधिकुर्वन्नप्यत्रिनविद्यात्वात्॥ ब्रह्मविद्यात्तु
नव्यामिश्रत्वात्तत्तस्तानप्यधिकरोतीत्यप्रयोजकत्वमाह यद्यपीति॥ तत्र देवादीनामधिकारस्य ॥ संभवे हेतुमाह
र्थित्वेति॥ वैराग्यादिबलचर्यादिसंभवहार्थमादिपदं द्विविधसामर्थ्यस्य प्रयोग्यताकारत्वास्याधिकारकारण
त्वेपि तत्प्रयोजकत्वेनाचिंत्याधास्क्षेयं अतिप्रसंगपदाबाधको ॥ प्रकृतं चेदमनुमानमित्याह नेति॥ राजसूया
धनधिकृतस्यापि ब्राह्मणस्य फलरूपस्पत्तिः सर्वे प्रामाण्यादधिकारः प्रकृते तु कथमित्याशंक्याह ब्रह्मेति॥ तत्र
ब्रह्मवेदनात्सर्वभावे स्थिते देवानां मध्ये यो यो देवः प्रतिबुद्धवानात्मानमहं ब्रह्मास्मीति स स प्रतिबोधे देवत
ब्रह्माभवत्तथा ऋषीणां तित्रयस्य च विद्याधिकारमाशंक्याह तेहेति॥ ते देवाश्चासुराश्चान्योन्यमुक्त्वं तत्किल
हंतयदनुमतिर्नवक्तो तद्धितमात्मानं विचारयामः॥ यं विचारतो ज्ञात्वा सर्वान्पि फलान्प्राप्नोतीत्युक्त्वा विचार्य
यरु यात्येन्द्रविरोचनौ प्रजापतिमाजग्मतुरित्यर्थः॥ चकारोवरुदारण्यककथा छांदोग्यश्रुतेः॥ समुच्चया
र्थः॥ श्रौतलिंगेनानुमानं बाधयित्वा स्मार्त्तेनापि तद्बाधं दर्शयति स्मार्त्तमिति॥ किमत्र ब्रह्मअमृतं किंस्विद्वे
द्यमनुत्तमं चिंतयेत्तत्र वै गत्वा गंधर्वोमामपृच्छत। विश्वावसुस्ततो राजन् वेदांतज्ञानकोविद इति मोक्ष
धर्मे जनकयाज्ञवल्क्यसंवादात् प्रह्लादाजगरसंवादाद्योक्तानुमानासिद्धिरित्यर्थः॥ आदित्यादिश
ब्दानां ज्योतिर्मण्डलविषयत्वात्तस्याचेतनस्य विग्रहादिरहितस्य नाधिकारोऽस्तीत्युक्तं तत्राह यद्यपीति

४७

गोलकादिषु प्रयुक्ताश्चक्षुरादिशब्दा नातिरिक्तेन्द्रियार्थत्ववदादित्यादिशब्दानां ज्योतिरादिषु प्रयोगे
पि तदतिरिक्तचेतनेषु युक्तिरित्याह ज्योतिरिति॥ दृष्टान्ते तिरिक्तेन्द्रियसत्वेमानवत् प्रकृते तन्नास्ती
त्याशंक्याह मंत्रेति॥ यथा चेतने देवतात्मन्यादित्यादिशब्दस्तथा मंत्रादिषु शब्दव्यवहारादिति हेत्वर्थः॥
कथं तर्हि ज्योतिरादिष्वादित्यादिशब्दस्तत्राह सत्वीति॥ देवादीनामैश्वर्यात्प्रतिपत्तियोगात्तच्चेतना
चेतनयोरादित्यादिशब्दानां मुख्यत्वसिद्धिरित्यर्थः॥ देवतानां विविधविग्रहग्रहणसामर्थ्यमानमाह त
थाहीति॥ स ब्रह्मणो नामे प्राक्तनगणप्रविष्टः कश्चिद्दिव्यविशेषस्तस्मिन्नबोधयत्यादय इन्द्र आगछत्वादिः॥ त
त्र मेधातिथेर्मेषेति इन्द्र संबोधनं मंत्रपदं श्रुतं तत्राच मेषेत्यभिधेति॥ इंद्रस्य नानाविग्रहयोगे पि देवतांत
रस्य किमित्याशंक्याह। स्मर्यते चेति॥ धर्मो वायुरिंद्रश्च पुरुषा भूत्वा तामेवोपजग्मुः अश्विनौ च पुरुषौ
भूत्वा माद्रीमुपजग्मतुरिति महाभारते प्रसिद्धमित्यर्थः॥ यत्तु मध्वादिषु चेतनत्वं तत्राधिष्ठातृवि
वक्षयाऽधिक्षेप्यविवक्षयाचेतनत्वं। प्रथमं प्रत्याह मृदब्रवीदिति॥ इति अधिष्ठातृचेतनोपगमेमा
नमाह यदिति॥ आदिशब्देनागादिसंवादो गृह्यते॥ द्वितीये तत्र तिके पितदिशमवेत्याह ज्योति
रादेरिति॥ मध्वादिषु अधिष्ठातृचेतन्याभिमानवदत्र तदभावादधि कस्तु रपि न चेतनत्वमित्याशंक्याह चे
तनास्त्विति॥ मंत्रादयो न स्वार्थे मानमन्यपरत्वात्किं चन्द्राणवाक्यवदित्युक्तमनुवदति यदपी
ति॥ यस्माल्लिंगमाद्यस्तित्र बाधीधिताधीस्तस्माच्छ्रावः सिध्यति॥ यत्र तु यतो मानानां तत्पाधीनत्व
तस्तत्सिद्धिरित्युत्सर्गस्तथा च मंत्रादिभ्योपि स्वार्थे चेदबाधिताधीस्तं स्ततस्ते षां तत्र प्रामाण्यं।

मित्याह तत्रेति ॥ अनन्यार्थत्वे स्वार्थे प्रामाण्यमन्यथा नेत्युक्तमाशंक्याह नेति ॥ न हि विधिमन्त्रयोर्वा पर
मन्यार्थत्वात्स्वार्थे मानं किंतु मानान्तराविरोधात् अवेक्षणस्य च संस्कारार्थस्य स्वार्थपरिच्छेदकत्वा
न्न च तथा विधं वाक्यं न परिच्छेदकं संवादविसंवादयोरयं तारतम्यात्पर्यस्य परिच्छेदश्चेत्स्यान्न वानन्यार्थत्वे
प्रामाण्ये प्रयोजकं अबाधितस्वार्थत्वात् नेतरभावेन प्रामाण्याच्चादृष्टेरित्यर्थः ॥ अन्यार्थत्वमप्रयोजकमि
त्युक्त्वा दृष्टान्तमाह यथाहीति ॥ प्रतिसंयोगिवस्तुतात्पर्यानपेक्षत्वेन प्रमाणं च क्षुद्वाक्यं तु यत्र तात्पर्यं त
त्रमानेन प्रत्यर्थमिति तद्वेशेष्यमाहात्रेति ॥ विधुद्देशो विधिवाक्यं विधिरुद्दिश्यतेऽनेनेति ॥ गुणपत्तेस्तुल्यत्वं
विधेः प्राशस्त्यलक्षणापरत्वेन तां तोक्तार्थ ॥ महावाक्यानां तत्र वाक्यभेदेन पृथक्त्वं स्यायकल्पे मंत्रादेर्वि
धेश्चेति ॥ त्याशंक्याह नहीति ॥ तत्र हेतोर्यथेति ॥ पदद्वयसंबंधादि धिरपि तत्र नास्त्यास्त निषेधयोगा
दित्याशंक्याह नेति ॥ न प्रत्ययमात्रादर्थसिद्धिस्तत्सत्त्व यस्यरागप्राप्ततया भ्रमत्वात् तत्प्राप्तस्य च रजता
दिवन्निषेधस्त्वित्यर्थः ॥ यद्यपि पदैकवाक्यतायां नार्थान्तरधीर्विशिष्टबोधनप्रयुक्तपदानामन्यत्रापर्यव
सानात्तथापि वाक्यैकवाक्यतायां द्वारार्थवाक्यान्तरधीः यथात्र द्वदत्तस्य गोः क्रेतव्या बहुक्षीरेत्यु
क्ते बहुक्षीरत्वद्वारा क्रयणीयत्वं प्रत्युपस्थितत्वमपि तात्पर्यं नेदाक्षातितयेऽथे ह्यपीत्याह तत्रेति ॥ आर्षवादिका
नां पदार्थानां साक्षाद्देवधिध्यन्वयेऽपि किमिति पृथगन्वयप्रतिपत्तिस्तत्राह ॥ यथाहीति ॥ अर्थवादस्थप
दार्थानां विधिना साक्षात्संबंधे योग्यत्वाभावं हेतुमाह नहीति ॥ कथं तर्हि विधिनैतेषामन्वयस्त
त्राह नाग्विति ॥ अध्ययनविध्युपात्तस्य तस्याक्षरमात्रस्यापि निष्फल्यापेक्षितफलाकांक्षायामर्थवादा